CC-0. In Public Domain. Digitization by eGangotri

सा. 2039 R.

संस्कृत-भाषा-प्रशिक्षणाय

संस्कृत-शिक्षणाभ्यासः

प्रथमो भागः

नीलमणिढुङ्गाना

महेन्द्र-संस्कृत-विश्वविद्यालयः

बेलझुण्डी, दाङ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri
सा. २०३९R.
R.

संस्कृतशिक्षणाभ्यासः

प्रथमो भागः

लेखकः
नीलमणिढुङ्गाना

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः
बेल्झुण्डी, दाङ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

☒ **प्रकाशक :**
महेन्द्रसंस्कृतविश्वविद्यालय :
बेल्झुण्डी, दाङ् ।

☒ **लेखक :** नीलमणिढुङ्गाना
☒ **संस्करणम् :** प्रथमम् २०५३
☒ **प्रकाशितप्रति** १०००

☒ **मूल्यम्** रू. ५२।-

☒ **कम्प्युटर :** स्क्रिप्टप्रो सर्भिस, बागबजार, काठमाडौं ।
फोन : २२७८७० ।
☒ **मुद्रक :** लिखु प्रिन्टर्स, माइतीघर, काठमाडौं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri
सा. २०३५ R

प्रकाशकीयम्

अनधीतसंस्कृतवाङ्मयानां तदध्येतुकामानां छात्राणां संस्कृतभाषायाः प्रशिक्षणाय महेन्द्रसंस्कृतविश्वविद्यालयेन कार्यक्रमोऽस्ति सञ्चालितः। कार्यक्रमस्यास्य पाठ्यक्रमे संस्कृतरचनासंबद्धोऽप्यंशोऽप्यस्ति निर्धारितः। परं सन्दर्भग्रन्थाभावेन छात्राणामध्ययनस्याध्यापनस्य च काठिन्यमनुभूतमासीत्, तन्निराकरणाय भाषाशिक्षणपद्धत्या संपादितेयं कृतिः संस्कृतभाषां प्रयोक्तुकामानां तदध्येतॄणाञ्च नूनमेवोपयोगिनी भवेदिति विश्वासः। सहप्राध्यापकेन नीलमणिढुङ्गानामहोदयेन संस्कृतभाषाशिक्षणाभ्यासस्य भागद्वयं निर्माय कार्यमेतद् यद् विहितं तस्य कृते तस्मै साधुवादमर्पयति

– माधवराजगौतमः
शिक्षाध्यक्षः

दिनाङ्का :
२०५३।३।२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेदनं किमपि

सत्यपि सुविस्तृते संस्कृतसाहित्ये सत्यामपि ग्रन्थनिर्माणपरम्परायां नूनमस्त्येव न्यून त्वं भाषाशिक्षण ग्रन्थानां विशेषतश्चाधुनिकभाषा-शिक्षणपद्धत्या रचितानामभ्यासग्रन्थानाम्। वस्तुतः संप्रति प्रचलितानुवाद-प्रणाल्यपि कक्षासमये भाषाशिक्षणस्य प्रतिकूलताामेव गाहते। परंपरागताश-बोधप्रणाल्यापि रचनाशिक्षणं कल्पनातीतमेवास्ति सञ्जातम्। इदानी पल्लवमात्रग्राहिणि शिक्षाक्रमे प्रवर्तमाने व्याकरणस्य सम्यगध्ययन-विरलतामेवाधत्ते। प्रायशः समग्रग्रन्थस्य पठनं पाठनञ्च साधु न प्रचलति। एतादृशे व्यतिकरे विद्यालयेषु विद्यापीठेषु च विविधान् विषयाननुवर्तमानानां छात्राणां सुरगिरा रचनाभ्यासस्तु प्रायेण दुस्साध्यतां गतः। प्रवेशिकापरीक्षामुत्तीर्य संस्कृतभाषाप्रशिक्षणाय मेहन्द्रसंस्कृतविश्वविद्यालयस्य विद्यापीठेषु समागताना-मनधीतसंस्कृतानां प्रशिक्षार्थिनां संस्कृतभाषाशिक्षणन्तु ततोऽप्यस्ति कठिनतरम्। स्वतन्त्ररुपेण संस्कृतभाषामधिगन्तुमिच्छतो जनाञ्च तदनुकुलग्रन्थानामभावो भृशं समुद्वेजयति। अतस्तेषां समेषां संस्कृतवाक्यरचनाशिक्षणस्य विविधानां मार्गाणां परिचायकोऽभ्यासप्रधानः सन्दर्भग्रन्थो नितरामासीदपेक्षितः। इमां समुपस्थिता-मपेक्षां पूरयितुं संस्कृतभाषाशिक्षणाभ्यासस्य भागद्वयं प्रणीय विद्यते समुपस्थापितम्, यच्च छात्राणां हिताय महेन्द्रसंस्कृतविश्वविद्यालयेन प्राकाश्यमस्ति नीतम्। भागद्वयोपेतोऽयं ग्रन्थो माध्यमिकोरत्तरमध्यम- स्तरयोर-धीयानानां छात्राणां सुगमया पद्धत्या संस्कृतरचनाशिक्षणाय सरलसंस्कृत-भाषानिबद्धानां काव्यानां स्वयमेवाध्ययनस्य शक्तेरुपलब्धये च संपत्स्यते। शास्त्रिस्तरे वैकल्पिकसंस्कृतरचनापत्रे निर्धारितानि कारकसूत्राण्यनुसृत्य संस्कृत-वाक्यरचनायाः शिक्षणाय ग्रन्थस्यास्य प्रथमो भाग उपयोगी भवेदिति मे विश्वासः। चेदनेन प्रयासेन भवन्ति विद्यार्थिन उपकृतास्तदाऽहं स्वं श्रमं सफलं मन्ये।

अन्त्ये च विद्यापीठसञ्चालनकर्मणि व्यापृतस्य मम रचनाश समुद्भाव्य यैर्विद्वद्भिः प्राध्यापकवर्यैः डा. ऋषिरामपोखेल- माधवराजगौत दत्तात्रेयदाहाल- डा. वेणीमाधवढकाल- माधवशरणो पाध्यायैर्भूयोभू कर्मण्यस्मिन् प्रेरितस्तेभ्यः सबहुमानं कृतज्ञतामुपहरामि। ग्रन्गास्यास्य मुद्रण विधौ नवीनैर्विचारैः सहाय्यं विदधद्भ्यां ध्रुवज्ञवाली- दिवाकराचार्याभ्याञ्च साधुवादं समर्पयामि।

श्रीमान्यान् महेन्द्रसंस्कृतविश्वविद्यालयस्य पदाधिकारिणः प्रत्यपि ससंमानं कृतज्ञतामावहामि, यैर्ग्रन्थोऽयं मुद्रयित्वा प्राकाश्यं नीतः।

विदुषां विधेयः
नीलमणिढुंगाना
(सहप्राध्यापकः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri
सा.२०३९R.

विषयसूची

१. प्रथमपाठः १ - ३
- उद्देश्यविधेयबोधः
- सामान्यवाक्यरचनाज्ञानम्
- सत्तार्थकास्धातोर्निष्पन्नानां वर्तमानकालिकक्रियापदानां वाक्येषु प्रयोगः
- रुपान्तरण-प्रयोग-प्रश्नोत्तरादिपद्धतिभिस्तेषामभ्यासः

२. द्वितीयपाठः ४ - ६
- सत्तार्थकास्धातोर्निष्पन्नानां भूतकालिकक्रियापदानां वाक्येषु प्रयोगः
- तेषामभ्यासः

३. तृतीयपाठः ७ - १०
- विधेयान्वयिविशेषणपदानां वाक्येषु प्रयोगः
- तेषामभ्यासः

४. चतुर्थपाठः ११ - १५
- कर्तृकारकशिक्षणम्
- केषाञ्चित् परस्मैपदीयधातुनिष्पन्नानां वर्तमानकालिकक्रियापदानां वाक्येषु प्रयोगः
- तेषामभ्यासः

५. पञ्चमपाठः १६ - १८
- आत्मनेपदीयधातुनिष्पन्नानां केषाञ्चिद् वर्तमानकालिकक्रियापदानां वाक्येषु प्रयोग :
- तेषामभ्यासः

६. षष्ठपाठः १९ - २१
- कोषाञ्चित् परस्मैपदीयधातुनिष्पन्नानां क्रियापदानां भूतकाले वाक्येषु प्रयोगः
- तेषामभ्यासः

७. सप्तमपाठः २२ - २३
- केषाञ्चिदात्मनेपदीयधातुनिष्पन्नानां क्रियापदानां भूतकाले वाक्येषु प्रयोगः
- तेषामभ्यासः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८. अष्टमपाठः २४ - २६

- भविष्यत्काले वाक्यरचनाज्ञानम्
- तेषामभ्यासः

९. नवमपाठः २७ - २८

- आज्ञार्थकवाक्यरचनाज्ञानम्
- तेषामभ्यासः
- एकसंख्यातो दशसंख्यापर्यन्तसंख्यावाचकपदानां वाक्येषु प्रयोगः
- तेषामभ्यासः

१०. दशमपाठः २९ - ४२

- कर्मपदानां वाक्येषु प्रयोगस्तदभ्यासश्च
- क्त्वा-ल्यप्-तुमुनन्तपदैः वाक्यसंश्लेषणम्
- एकादशादिपञ्चविंशतिपर्यन्तसंख्यावाचकपदानां वाक्येषु प्रयोगस्तदभ्यासश्च

११. एकादशपाठः ४३ - ४७

- करणपदानां वाक्येषु प्रयोगस्तदभ्यासश्च

१२. द्वादशपाठः ४८ - ५४

- वाच्यज्ञानम्
- वाच्यपरिवर्तनाभ्यासः
- एकत्रिंशदादिपञ्चाशत्पर्यन्त-संख्यावाचकपदानां वाक्येषु प्रयोगस्तदभ्यासश्च

१३. त्रयोदशपाठः ५५ - ५९

- संप्रदानकारकशिक्षणम्
- चतुर्थ्यन्तपदानां वाक्येषु प्रयोगस्तदभ्यासश्च

१४. चतुर्दशपाठः ६० - ६५

- आपादानकारकशिक्षणम्
- पञ्चम्यन्तपदानां वाक्येषु प्रयोगस्तदभ्यासश्च
- एकपञ्चाशदादिदशपद्मपर्यन्त-संख्यावाचकपदानां वाक्येषु प्रयोगः

१५. पञ्चदशपाठः ६६ - ६९

- षष्ठ्यन्तपदानां वाक्येषु प्रयोगस्तदभ्यासश्च
- प्रथमद्वितीयादिसंख्यापूरणार्थकपदानां ज्ञानम्, वाक्येषु प्रयोगस्तभ्यासश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१६. षोडशपाठः ७० – ७२

- अधिकरणकारकज्ञानम्
- सप्तमीविभक्त्यन्तपदानां वाक्येषु प्रयोगस्तदभ्यासश्च

१७. सप्तदशपाठः ७३ – ७६

- प्रेरणार्थकवाक्यरचना
- तदभ्यासः
- सरल-संयुक्त-मिश्रवाक्यरचना,
- तदभ्यासः

१८. अष्टादशपाठः ७७ – ८१

- प्रत्याहारज्ञानम्
- संज्ञासूत्रज्ञानम्
- सन्धिप्रक्रियाबोधः
- सन्ध्यभ्यासः

१९. एकोनविंशतितमः पाठः ८२ – ९०

- कारकसूत्राणि, तेषामर्थबोधः, तदनुसारं वाक्यरचना च

२०. विंशतितमः पाठः ९१ – ९४

- समासज्ञानम्,
- तदभ्यासः

२१. परिशिष्टभागः ९५ – १०७

- पुस्तकेऽस्मिन् प्रयुक्ताः प्रमुखधातवः, तेषामर्थाश्च
- सोपसर्गाणां प्रमुखधातूनां प्रयोगास्तेषामर्थश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमः पाठः

प्रथमपुरुषे -	एकव.	रामः	अस्ति
	द्विव.	रामौ	स्तः
	बहुव.	रामाः	सन्ति
मध्यमपुरुषे -	एकव.	त्वम्	असि
	द्विव.	युवाम्	स्थः
	बहुव.	यूयम्	स्थ
उत्तमपुरुषे -	एकव.	अहम्	अस्मि
	द्विव.	आवां	स्वः
	बहुव.	वयं	स्मः

. अधोलिखितवाक्यानि पठत ।

सः अस्ति । तौ स्तः । ते सन्ति । त्वम् असि । युवां स्थः । यूयं । अहम् अस्मि । आवां स्वः । वयं स्मः । सीता अस्ति । सीते स्तः । ताः सन्ति । कविः अस्ति । कवी स्तः । कवयः सन्ति । मुनिः अस्ति । ी स्तः । मुनयः सन्ति । गुरुः अस्ति । गुरू स्तः । गुरवः सन्ति । भानुः स्ति । भानू स्तः । भानवः सन्ति । नदी अस्ति । नद्यौ स्तः । नद्यः न्ति । युवती अस्ति । युवत्यौ स्तः । युवत्यः सन्ति । पिता अस्ति । तरौ स्तः । पितरः सन्ति । माता अस्ति । मातरौ स्तः । मातरः सन्ति । ाता अस्ति । भ्रातरौ स्तः । भ्रातरः सन्ति । सखा अस्ति । सखायौ स्तः । खायः सन्ति । राजा अस्ति । राजानौ स्तः । राजानः सन्ति ।

२. बहुवचने परिवर्तनं कुरुत ।

. रमेश अस्ति । अर्जुनौ स्तः । त्वम् असि । युवां स्थः । अहम् स्मि । आवाम् स्वः । सा अस्ति । दुर्गे स्तः । हरिः अस्ति । ऋषी स्तः । निः अस्ति । विधू स्तः । नदी अस्ति । चम्वौ स्तः । नृपः अस्ति । नरेशौ तः । दुर्गा अस्ति । पार्वत्यौ स्तः । सखा अस्ति । नद्यौ स्तः । गोदावरी स्ति । भागिरथ्यौ स्तः । सखायौ स्तः । राजा अस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमः पाठः

प्रथमपुरुषे -	एकव.	रामः	अस्ति
	द्विव.	रामौ	स्तः
	बहुव.	रामाः	सन्ति
मध्यमपुरुषे -	एकव.	त्वम्	असि
	द्विव.	युवाम्	स्थः
	बहुव.	यूयम्	स्थ
उत्तमपुरुषे -	एकव.	अहम्	अस्मि
	द्विव.	आवां	स्वः
	बहुव.	वयं	स्मः

. अधोलिखितवाक्यानि पठत ।

सः अस्ति । तौ स्तः । ते सन्ति । त्वम् असि । युवां स्थः । यूयं । अहम् अस्मि । आवां स्वः । वयं स्मः । सीता अस्ति । सीते स्तः । ताः सन्ति । कविः अस्ति । कवी स्तः । कवयः सन्ति । मुनिः अस्ति । ी स्तः । मुनयः सन्ति । गुरुः अस्ति । गुरू स्तः । गुरवः सन्ति । भानुः स्ति । भानू स्तः । भानवः सन्ति । नदी अस्ति । नद्यौ स्तः । नद्यः न्ति । युवती अस्ति । युवत्यौ स्तः । युवत्यः सन्ति । पिता अस्ति । तरौ स्तः । पितरः सन्ति । माता अस्ति । मातरौ स्तः । मातरः सन्ति । ता अस्ति । भ्रातरौ स्तः । भ्रातरः सन्ति । सखा अस्ति । सखायौ स्तः । खायः सन्ति । राजा अस्ति । राजानौ स्तः । राजानः सन्ति ।

२. बहुवचने परिवर्तनं कुरुत ।

रमेश अस्ति । अर्जुनौ स्तः । त्वम् असि । युवां स्थः । अहम् स्मि । आवाम् स्वः । सा अस्ति । दुर्गे स्तः । हरिः अस्ति । ऋषी स्तः । निः अस्ति । विधू स्तः । नदी अस्ति । चम्वौ स्तः । नृपः अस्ति । नरेशौ तः । दुर्गा अस्ति । पार्वत्यौ स्तः । सखा अस्ति । नद्यौ स्तः । गोदावरी स्ति । भागिरथ्यौ स्तः । सखायौ स्तः । राजा अस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१.३. द्विवचने परिवर्तनं कुरुत ।

स: अस्ति । ते सन्ति । त्वम् असि । यूयं स्थ । अहम् अस्मि । वयं स्म: । राम: अस्ति । सीता: सन्ति । उमेश: अस्ति । रमेशा: सन्ति । लता अस्ति । हरय: सन्ति । नदी अस्ति । रिपव: सन्ति । भानु: अस्ति । युवत्य: सन्ति । रेवती अस्ति । कालिका: सन्ति । बालिका अस्ति । रमा: सन्ति । पुष्पम् अस्ति । कुसुमानि सन्ति । फलम् अस्ति । वनानि सन्ति । कमलम् अस्ति । जलानि सन्ति । अरण्यम् अस्ति । उपवनानि सन्ति । रेवा अस्ति । वृक्षा: सन्ति । धेनु: अस्ति । नार्य: सन्ति । एषा अस्ति । एते सन्ति । बालका: सन्ति । वानर: अस्ति । मानवा: सन्ति । सिंह: अस्ति । भल्लूका: सन्ति । ग्रह: अस्ति । नक्षत्राणि सन्ति । चन्द्रिका अस्ति । तारका: सन्ति । देवी अस्ति । वध्व: सन्ति । धेनु: अस्ति । तरव: सन्ति । सती अस्ति । फलानि सन्ति । प्राणी अस्ति । विद्यार्थिन: सन्ति । पत्रिका अस्ति । मेषा: सन्ति । अजा अस्ति । वाप्य: सन्ति । भृङ्ग: अस्ति । शृगाला: सन्ति । व्याघ्र: अस्ति । मृगा: सन्ति ।

१.४. एकवचने परिवर्तनं कुरुत ।

दानवा: सन्ति । मानवौ स्त: । युवां स्थ: । यूयं स्थ । आवां स्व: । वयम् स्म: । रमे स्त: । अपर्णा: सन्ति । लते स्त: । हरय: सन्ति । नद्यौ स्त: । हरी स्त: । मानवा: सन्ति । रवी स्त: । गुरव: सन्ति । पितरौ स्त: । भ्रातर: सन्ति । मातरौ स्त: । सखाय: सन्ति । राजानौ स्त: । विधव: सन्ति । पार्वत्यौ स्त: । सखायौ स्त: । रमा: सन्ति । नद्यौ स्त: । राजान: सन्ति ।

१.५. स्वकीयवाक्येषु प्रयोगं कुरुत ।

स: । तौ । ते । त्वम् । युवाम् । यूयम् । अहम् । आवाम् । वयम् । नर: । देवौ । वृक्षा: । उमा । लते । कविता: । यति: । मुनी । हरय: । गुरु: । भानू । रिपव: । नदी । गौर्यौ । चमर्य: । भ्राता । मातरौ । पितर: । सखा । राजानौ ।

१.६. अस् धातोर्वर्तमानकाले (लटि) रूपाणि लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१.७. नर-लता-मुनि-विधु-नदी-पितृ-सखि-राजन्शब्दानां प्रथमाविभक्तौ रूपाणि लिखत ।

१.८ कोष्ठस्थपदान्यनुसृत्य, उत्तराणि लिखत ।

१ सः कः अस्ति ? सः (शिक्षक)

२. तौ कौ स्तः ? तौ (प्राध्यापक)

३. ते के सन्ति ? ते (गुरु)

४. त्वं कः असि ? अहम् (प्राचार्य)

५. युवाम् कौ स्थः ? आवाम् (पूजक)

६. यूयं के स्थ ? वयम् (छात्र)

७. अहम् कः अस्मि ? त्वम् (कृषक)

८. आवां कौ स्वः ? युवाम् (सखि)

९. वयम् के स्मः ? यूयम् (भारवाहक)

१०. सा का अस्ति ? (बालिका)

११. ते के स्तः ? (अजा)

१२. ताः काः सन्ति ? (युवति)

१३. तत् किम् अस्ति ? (फल)

१४. ते के स्तः ? (भवन)

१५. तानि कानि सन्ति ? (नक्षत्र)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयपाठः

प्रथमपुरुषे-	एकव. द्विव. बहुव.	सः तौ ते	आसीत् । आस्ताम् । आसन् ।
मध्यमपुरुषे-	एकव. द्विव. बहु.	त्वम् युवाम् यूयम्	आसीः । आस्तम् । आस्त ।
उत्तमपुरुषे-	एकव. द्विव. बहुव.	अहम् आवाम् वयम्	आसम् । आस्व । आस्म ।

२.१. अधोलिखितवाक्यानि पठत ।

सः आसीत् । रामौ आस्ताम् । श्यामाः आसन् । कृष्णः आसीत् । कृष्णौ आस्ताम् । रमाः आसन् । लते आस्ताम् । हरयः आसन् । नदी आसीत् । पार्वत्यौ आस्ताम् । पितरः आसन् । राजा आसीत् । राजानौ आस्ताम् । राजानः आसन् । त्वम् आसीः । युवाम् आस्तम् । यूयम् आस्त । अहम् आसम् । आवाम् आस्व । वयम् आस्म ।

२.२. एकवचने परिवर्तनं कुरुत ।

रामाः आसन् । युवाम् आस्तम् । यूयम् आस्त । आवाम् आस्व । वयम् आस्म । नद्यौ आस्ताम् । मुनयः आसन् । गौर्यौ आस्ताम् । चमर्यः आसन् । बालकौ आस्ताम् । लताः आसन् । मुनी आस्ताम् । पितरः आसन् । भ्रातरौ आस्ताम् । राजानः आसन् । सखायौ आस्ताम् । कृष्णाः आसन् । स्त्रियौ आस्ताम् ।

२.३. द्विवचने परिवर्तनं कुरुत ।

रामः आसीत् । अनुजाः सन्ति । केशवः अस्ति । नद्यः आसन् । हरयः सन्ति । पिता आसीत् । खगाः आसन् । अहम् आसम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वयम् स्मः । एताः सन्ति । इमे आसन् । का आसीत् ? कवयः सन्ति । भानवः आसन् । गुरुः आसीत् । गुरवः सन्ति । द्यौः अस्ति । राजा आसीत् । नृपाः सन्ति । फलानि आसन् । अन्नानि सन्ति । भवनम् आसीत् । वनानि सन्ति ।

२.४. बहुवचने परिवर्तनं कुरुत ।

केशवः आसीत् । त्वम् आसीः । अहम् आसम् । आवाम् आस्व । रामौ आस्ताम् । युवाम् आस्तम् । बालिका आसीत् । बालिके आस्ताम् । कविः आसीत् । नद्यौ आस्ताम् । पुष्पम् आसीत् । कुसुमे आस्ताम् । नारी आसीत् । चमर्यौ आस्ताम् । गुरुः आसीत् । भानू आस्ताम् । विधवा आसीत् । फले आस्ताम् । गर्दभः आसीत् । वानरौ आस्ताम् । कमला आसीत् । रमे आस्ताम् । स्त्रियौ आस्ताम् । मित्रे आस्ताम् । चन्द्रिका आसीत् । चम्वौ आस्ताम् । सखा आसीत् । राजानौ आस्ताम् । पिता आसीत् । मातरौ आस्ताम् । भ्राता आसीत् । श्वसुरः आसीत् । नप्तारौ आस्ताम् । भगिनी आसीत् । भागिनेयौ आस्ताम् । पत्रम् आसीत् । जामातरौ आस्ताम् । चक्रवाकवधूः आसीत् । सखायौ आस्ताम् । रिपुः अस्ति । शत्रू स्तः । नक्षत्रम् अस्ति । बालिके स्तः । तारका अस्ति । एकः अस्ति । द्वौ स्तः ।

२.५. वर्तमानकाले परिवर्तनं कुरुत ।

रमेशः आसीत् । उमेशौ आस्ताम् । मुनयः आसन् । त्वम् आसीः । युवाम् आस्तम् । यूयम् आस्त । अहम् आसम् । स्त्रियौ आस्ताम् । सखायः आसन् । राजानौ आस्ताम् । वैद्याः आसन् । चमूः आसीत् । भूपतयः आसन् । खगौ आस्ताम् । पक्षिणः आसन् ।

२.६. भूतकाले परिवर्तनं कुरुत ।

सः अस्ति । तौ स्तः । ते सन्ति । त्वम् असि । युवां स्थः । यूयं स्थ । अहम् अस्मि । आवाम् स्वः । वयं स्मः । केशवः अस्ति । रामौ स्तः । रामाः सन्ति । बालिका अस्ति । बालिके स्तः । बालिकाः सन्ति सिंहः न अस्ति । भल्लूकौ न स्तः । वानराः न सन्ति । मुनिः न अस्ति कवी न स्तः । कपयः न सन्ति । भानुः न अस्ति । गुरू न स्तः । विधवाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न सन्ति। कोकिलः न अस्ति। पुष्पे न स्तः। कुसुमानि न सन्ति। चमरी अस्ति। स्त्रियौ स्तः। नार्यः न सन्ति। वधूः अस्ति। रिपू स्तः। रिपवः न सन्ति। तारकाः सन्ति। नक्षत्राणि सन्ति। वने स्तः। भवनानि सन्ति। चमूः अस्ति। चक्रवाकाः सन्ति। शूकरौ स्तः। मार्जाराः सन्ति। भेकः अस्ति।

२.७ अस्धातोर्भूतकाले (लुङ्) रूपाणि लिखत।

२.८. परस्परं मेलयत

(क)	(ख)
(१) श्यामः	(क) स्मः
(२) केशवौ	(ख) सन्ति
(३) हंसाः	(ग) स्वः
(४) त्वम्	(घ) स्थ
(५) युवाम्	(ङ) अस्मि
(६) यूयम्	(च) स्तः
(७) अहम्	(छ) अस्ति
(८) आवाम्	(ज) असि
(९) वयम्	(झ) स्थः

२.१०. कोष्ठस्थपदानि प्रयुज्य प्रश्नानामुत्तराणि लिखत।

अयं कः अस्ति ? (राम) ।
इमे के सन्ति ? (कर्मकर)।
तौ कौ स्तः ? (प्राध्यापक)।
इयं का अस्ति ? (बालिका)।
इमाः काः सन्ति ? (नारी)।
ते के स्तः ? (रम्भा)।
तत् किम् अस्ति ? (पुस्तक)।
तानि कानि सन्ति ? (पुष्प)।
इमे के स्तः ? (पुष्प)।

इमौ कौ स्तः ? (कवि)
स कः अस्ति ? (कुलसचिव)
ते के सन्ति ? (प्राचार्य)
इमे के स्तः ? (छात्रा)
सा का अस्ति ? (शिक्षिका)
ताः काः सन्ति ? (चमरी)
ते के स्तः ? (फल)
इदम् किम् अस्ति ? (पत्र)
इमानि कानि सन्ति ? (कुसुम)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयपाठः

(विशेषणपदप्रयोगः)

पुंलिङ्गे

प्रथमपुरुषे-	एकव.	रामः	सुन्दरः	अस्ति ।
	द्विव.	रामौ	सुन्दरौ	स्तः
	बहु.	रामाः	सुन्दराः	सन्ति
मध्यमपुरुषे-	एकव.	त्वम्	सुन्दरः	असि
	द्विव.	युवाम्	सुन्दरौ	स्थः
	बहुव.	यूयम्	सुन्दराः	स्थ
उत्तमपुरुषे-	एकव.	अहम्	सुन्दरः	अस्मि
	द्विव.	आवाम्	सुन्दरौ	स्वः
	बहुव.	वयम्	सुन्दराः	स्मः ।

स्त्रीलिङ्गे

प्रथमपुरुषे-	एकव.	सीता	सुन्दरी	अस्ति
	द्विव.	सीते	सुन्दर्यौ	स्तः ।
	बहुव.	सीताः	सुन्दर्यः	सन्ति ।
मध्यमपुरुषे-	एकव.	त्वम्	सुन्दरी	असि ।
	द्विव.	युवाम्	सुन्दर्यौ	स्थः ।
	बहुव.	यूयं	सुन्दर्यः	स्थ ।
उत्तमपुरुषे-	एकव.	अहं	सुन्दरी	अस्मि
	द्विव.	आवाम्	सुन्दर्यौ	स्वः
	बहुव.	वयम्	सुन्दर्यः	स्मः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपुंसकलिङ्गे

प्रथमपुरुषे-	एकव.	फलम्	सुन्दरम्	अस्ति ।
	द्विव.	फले	सुन्दरे	स्तः ।
	बहुव.	फलानि	सुन्दराणि	सन्ति ।

३.१. अधोलिखितवाक्यानि पठत ।

रामः सुन्दरः अस्ति । अर्जुनौ निर्मलौ स्तः । श्यामाः सु
सन्ति । रमा शुद्धा अस्ति । लते निष्फले स्तः । गौर्यौ सपुत्रे स्तः । व
कपिलः अस्ति । रामौ कपिलौ स्तः । वायसाः कृष्णाः सन्ति ।
कृष्णः अस्ति । खगौ पीनौ स्तः । खगाः श्वेताः सन्ति । फलम् र
अस्ति । फले रक्ते स्तः । फलानि रक्तानि सन्ति । वनम् घनम् अ
वने घने स्तः । वनानि घनानि सन्ति । हरिः सुन्दरः अस्ति । हरी सु
स्तः । हरयः सुन्दराः सन्ति । रामः गच्छन् अस्ति । रामौ गच्छन्तौ स
रामाः गच्छन्तः सन्ति । सीता गच्छन्ती अस्ति । सीते गच्छन्त्यौ स
सीताः गच्छन्त्यः सन्ति । फलम् पतत् अस्ति । फले पतती स
फलानि पतन्ति सन्ति । अहम् भ्रमन् अस्मि । आवां भ्रमन्तौ स्वः ।
भ्रमन्तः स्मः ।

३.२. निम्नप्रश्नानामुत्तराणि लिखत ।

१. रामः कीदृशः अस्ति ? २. कौ निर्मलौ स्तः ?
३. काः सुन्दर्यः सन्ति ? ४. रमा कीदृशी अस्ति ?
५. के निष्फले स्तः ? ६. गौर्यौ कीदृश्यौ स्तः?
७. कः कपिलः अस्ति ? ८. वायसाः कीदृशाः सन्ति ?
९. कः कृष्णः अस्ति ? १०. कौ पीनौ स्तः ?
११. के श्वेताः सन्ति ? १२. फलम् कीदृशम् अस्ति ?
१३. के रक्ते स्तः ? १४. कानि रक्तानि सन्ति ?
१५. वनम् कीदृशम् अस्ति ? १६ के घने स्तः ?
१७. कानि घनानि सन्ति ? १८. हरिः कीदृशः अस्ति ?
१९. कौ सुन्दरौ स्तः ? २०. हरयः कीदृशाः सन्ति ?
२१. रामः किं कुर्वन् अस्ति ? २२. कौ गच्छन्तौ स्तः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२३. रामा: किं कुर्वन्त: सन्ति ? २४. सीता किं कुर्वन्ती अस्ति ?
२५. के गच्छन्त्यौ स्त: ? २६. सीता: किं कुर्वन्त्य: सन्ति ?
२७. किम् पतत् अस्ति ? २८. फले किं कुर्वती स्त: ?
२९. कानि पतन्ति सन्ति ? ३०. त्वम् किं कुर्वन् असि ?
३१. युवां किं कुर्वन्तौ स्थ: ? ३२. यूयं किं कुर्वन्त: स्थ ?

३.३. बहुवचने परिवर्तनं कुरुत।

श्याम: पठन् अस्ति। अनुजौ क्रीडन्तौ स्त:। सीता लिखन्ती अस्ति। रमे धावन्त्यौ स्त:। हरि: कथयन् अस्ति। मुनी वदन्तौ स्त:। भानु: तपन् अस्ति। विधू प्रकाशमानौ स्त:। बालक: शयान: अस्ति। नदी वहन्ती अस्ति। गौर्यौ गच्छन्त्यौ स्त:। त्वम् गच्छन्ती असि। युवाम् पतन्त्यौ स्थ:। अहम् सुन्दरी अस्मि। आवाम् वसन्तौ स्व:। एषा क्रन्दन्ती अस्ति। इमौ लिखन्तौ स्त:। जम्बूक: क्रोशन् अस्ति। फले पक्वे स्त:। वनम् हरिद्वर्णम् अस्ति। अहम् धावन् अस्मि। आवाम् पठन्तौ स्व:।

३.४. गच्छत्-भ्रमत्-पतत्-सुन्दर-घन-कृष्ण-श्वेतशब्दानां त्रिषु लिङ्गेषु प्रथमा-विभक्तौ रूपाणि लिखत।

३.५. कोष्ठमनुसृत्य रिक्तस्थानं पूरयत।

(१) राम: .... अस्ति (गम्)।
(२) केशवौ .... स्त: (धाव्)
(३) सीता .... आसीत् (सुन्दर)
(४) रमे .... स्त: (कुरूप)
(५) श्यामा: .... सन्ति (शी)
(६) अहम् .... अस्मि (हस्)
(७) आवाम् .... स्व: (क्रीड्)
(८) वयम् .... स्म: (लिख्)
(९) नदी .... अस्ति (वह्)
(१०) गौर्यौ .... स्त: (रूपवती)
(११) फलानि .... सन्ति (पक्व)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१२) निर्झराः .... आसन् (पत्)
(१३) हिमशिखराणि .... सन्ति (धवल)
(१४) वने .... स्तः (कृष्ण)
(१५) घोटकौ .... स्तः (श्वेत)
(१६) भवनानि .... सन्ति (सुन्दर)
(१७) चमर्यः .... आसन् (चर्)
(१८) सरितौ .... स्तः (निर्मल)
(१९) कमलानि .... सन्ति (शुभ्र)
(२०) हर्म्ये .... स्तः (उन्नत)

३.६. अधस्तनपदानां वाक्येषु प्रयोगं कुरुत ।

पक्वम् । श्वेतौ । निर्मले । क्षालयन्ती । लिखन्त्यौ । धावन्त्यः । भ्रमन्तः । सुन्दर्यः । क्रन्दन् । शुभ्रः । मनोहरम् । विकसत् । द्योतयन् । क्रीडन्त्यौ । पठन्ती । पतन्ति । पश्यन्त्यः । धवलौ । वदन् । सुन्दर्यौ । क्रोशन्तौ । गर्जन्तः । शुद्धम् ।

३.७. (३.१ ३.३) निर्दिष्टवाक्यानां भूतकाले परिवर्तनं कुरुत ।

३. ८. कोष्ठम् अनुसृत्य उत्तरम् लिखत ।

१. सा का अस्ति ? सा (शिक्षिका)
२. ते के स्तः ? ते (छात्रा)
३. ताः काः सन्ति ? ताः (युवती)
४. त्वं का असि ? अहम् (सीता)
५. युवां के स्थः ? आवाम् (अनुजा)
६. यूयं काः स्थ ? वयम् (अग्रजा)
७. अहं का अस्मि ? त्वम् (भगिनी)
८. आवां के स्वः ? युवाम् (परिचारिका)
९. वयं काः स्मः ? यूयम् (जननी)

३.९. (३.३) निर्दिष्टवाक्यानां प्रश्नार्थकवाक्येषु परिवर्तनं कुरुत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थपाठः

प्रथमपुरुषे-	एकव.	रामः	पठति ।
	द्विव.	रामौ	पठतः ।
	बहुव.	रामाः	पठन्ति ।
मध्यमपुरुषे-	एकव.	त्वं	पठसि ।
	द्विव.	युवाम्	पठथः ।
	बहुव.	यूयम्	पठथ ।
उत्तमपुरुषे-	एकव.	अहम्	पठामि ।
	द्विव.	आवाम्	पठावः
	बहुव.	वयम्	पठामः

४.१. अधोलिखितवाक्यानि पठत ।

रामः पठति । सीते हसतः । रमाः गच्छन्ति । त्वं रोदिसि । युवां क्रन्दथः । यूयम् आगच्छथ । अहं हसामि । आवां पचावः । वयं त्यजामः । शिष्यः नमति । शिष्यौ नमतः । शिष्याः नमन्ति । उमेशः पिबति । उमेशौ पिबतः । उमेशाः पिबन्ति । लता त्रुटति । लते त्रुटतः । लताः त्रुटन्ति । कविः सृजति । कवी सृजतः । कवयः सृजन्ति । छात्रः पठति । छात्रौ पठतः । छात्राः पठन्ति । पिता क्षाम्यति । पितरौ क्षाम्यतः । पितरः क्षाम्यंन्ति । त्वम् क्षाम्यसि । युवां क्षाम्यथः । यूयम् क्षाम्यथ । अहम् क्षाम्यामि । आवां क्षाम्यावः । वयं क्षाम्यामः ।

४.२. बहुवचने परिवर्तनं कुरुत ।

रामः पठति । केशवः हसति । देवौ गच्छतः मनुष्यौ पश्यतः । खगः उद्गच्छति । त्वम् वदसि । अहं वदामि । आवां क्रीडावः । सीता नृत्यति । उमेशः आगच्छति । रमे पठतः । सः काङ्क्षति । त्वम् त्यजसि । शिष्यौ नमतः । अहं नमामि । आवां पचावः । केशवौ पिबतः । लुब्धकः भ्रमति । विप्रौ त्यजतः । याचकः याचति । अहम् वदामि । माधवः रक्षति । गोविन्दौ वसतः । गर्दभः वहति । आवाम् तिष्ठावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चौरः हरति । बालकः क्रन्दति । अहम् वाञ्छामि । शृगालौ क्रोशतः । सिंहः गर्जति । व्याघ्रौ धावतः । मृगः चरति । वृकौ खादतः । हरी किरतः । मूर्खः तुदति । सर्पः गिरति । कृषकौ कर्षतः । केशवौ क्षिपतः । त्वं पृच्छसि । आवाम् मुञ्चावः । युवाम् स्पृशथः । बालकौ लिखतः । अहम् प्रविशामि । तारके स्फुरतः । बालिका तुष्यति । मयूरौ नृत्यतः । गोधूमः नश्यति । पुत्रौ क्रुध्यतः । अहम् क्षुध्यामि । तौ सीदतः । बालिके लिखतः । नरौ शोचतः । कृषकः वपति । मेघः वर्षति । सैनिकौ रक्षतः । भूपालः जयति । आवाम् क्रीडावः । विष्णू तरतः । कृषकः खनति । गायकौ गायतः । मूषकः चर्वति । नापितौ क्षुरतः । विप्रः जीवति । अग्निः ज्वलति । सूर्यः तपति । सः तर्जति । मूर्खौ तर्दतः । हंसः तरति । आवाम् नन्दावः । खलौ निन्दतः । बालकौ पुष्यतः । छात्रः बोधति । भगिन्यौ मूर्छतः । मुनिः शपति । कवी सृजतः । युवाम् सिञ्चथः । अयम् स्मरति । केशवौ उत्तरतः । वृक्षौ फलतः । तौ क्षिपतः । एतौ जिघ्रतः । लते त्रुटतः । विमलौ भक्षयतः । चौरः चोरयति । अर्जुनौ कथयतः । वृद्धः न स्मरति । देवौ न जल्पतः । आवां प्रक्षिपावः । अयम् मुञ्चति । मशकौ दशतः । एषा चिन्तयति ।

४.३. द्विवचने परिवर्तनं कुरुत ।

केशवः गच्छति । कमलाः मिलन्ति । सर्पः दशति । इमे मुञ्चन्ति । गुरवः पाठयन्ति । एते क्षिपन्ति । अहम् चिन्तयामि । एषा लिम्पति । मूर्खः तर्दति । हरयः तरन्ति । कृषकः सिञ्चति । व्याघ्राः गर्जन्ति । मृगः धावति । कविः सृजति । बालकाः पिबन्ति । मुनयः जपन्ति । वयं स्मरामः । भृत्यः चलति । एते मुञ्चन्ति । चौराः चोरयन्ति । मनुजाः मूर्छन्ति । अहं खनामि । वयं तरामः । पिता क्षाम्यति । बालकाः क्रीडन्ति । मूषकः खनति । हरयः कुप्यन्ति । वयं तिष्ठामः । बृषभौ पिबतः । त्वं क्षुरसि । ते नमन्ति । भ्रमराः भ्रमन्ति । यूयं पश्यथ । वयं पश्यामः । ते पुष्यतः । लताः फलन्ति । मूषकाः प्रविशन्ति । मूर्खाः निन्दन्ति । हाराः त्रुटन्ति । हरिणाः चर्वन्ति । वयं जपामः । भटः जयति । इमौ कथयतः । अहं लिम्पामि । वयं गायामः । कृषकाः वपन्ति । यूयं जीवथ । कवयः सृजन्ति । असुराः क्रुध्यन्ति । त्वं शोचसि । बालिकाः क्रीडन्ति । ते हरन्ति । श्यामाः यजन्ति । त्वं वदसि । माधवाः तर्दन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वयं त्यजामः । पयोदः वर्षति । सैनिकाः धावन्ति । याज्ञिकः यजति । गोविन्दः याचति । अहं भजामि । ते तिष्ठन्ति । नद्यः वहन्ति । बालिका क्रन्दति । यूयं वाञ्छथ । छात्राः लिखन्ति । मुनयः तपन्ति । सा वदति । ते लिम्पन्ति । शिक्षकः पाठयति । हाराः त्रुटन्ति । मनुजाः शोचन्ति । मूकः न वदति ।

४.४. एकवचने परिवर्तनं कुरुत ।

अनुजौ गच्छतः । भ्रातरः पठन्ति । वयं हसामः । कमले पश्यतः । युवां नमथः । वयं क्रीडामः । यूयं नृत्यथ । हरयः गर्जन्ति । कवयः सृजन्ति । यतयः जपन्ति । यूयं त्यजथ । वयं काङ्क्षामः । पितरः पृच्छन्ति । ते स्पृशन्ति । ताः क्षिपन्ति । वयं लिखामः । यूयं नयथ । ईश्वराः रक्षन्ति । एताः हरन्ति । केशवाः तर्दन्ति । बालिकाः लिम्पन्ति । एते गायन्ति । कृषकाः वपन्ति । वयं जीवामः । भागिरथ्यौ वहतः । ते खनन्ति । क्रमेलकाः वहन्ति । यूयं यजथ । ताः निन्दन्ति । वयं नमामः । मूषकाः प्रविशन्ति । सिंहाः गर्जन्ति । मेषाः चरन्ति । अजाः भ्रमन्ति । छात्रौ पठतः । वयं भ्रमामः । हारौ त्रुटतः । नापितौ क्षुरतः । वानराः आरोहन्ति । वृद्धौ स्खलतः । युवकाः चलन्ति । बालिके क्रन्दतः । नृपाः यजन्ति । विप्रौ जपतः । भिक्षुकौ यातः । आवां चलावः । एते कथयन्ति । शृगालाः क्रोशन्ति ।

४.५. प्रथमपुरुषे परिवर्तनं करुत ।

अहं गच्छामि । आवां पठावः । वयं हसामः । त्वं पठसि । युवां लिम्पथः । यूयं जपथ । अहं धावामि । आवां सृजावः । वयं त्यजामः । त्वं क्रुध्यसि । युवां नृत्यथः । युवां काङ्क्षथः । यूयं क्षुरथ । वयं भ्रमामः । यूयं स्खलथ । अहं वाञ्छामि । आवां पठावः । त्वं क्रन्दसि । युवां धावथः । यूयं जपथ । वयं चर्वामः । अहं यजामि । आवां क्रीडावः । त्वं वदसि । युवां मूर्छथः । यूयं शोचथ । अहं जीवामि । आवां हसावः । वयं रक्षामः । त्वं तरसि । युवां क्रुध्यथः । यूयं किरथ । अहं तिष्ठामि । आवां जिघ्रावः । वयं नयामः । त्वं सीदसि । युवां पृच्छथः । यूयं क्रोशथ । अहं गच्छामि । आवां क्षिपावः । वयं नमामः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४.६. मध्यमपुरुषे परिवर्तनं कुरुत ।

सः गच्छति । तौ पठतः । ते हसन्ति । अहं जपामि । आवां क्रीडावः । वयं यजामः । वायुः चलति । श्यामौ क्रोशतः । याचकौ याचतः । रामः पश्यति । आवां सृजावः । हरयः गर्जन्ति । मुनयः तपन्ति । वयं नृत्यामः । खलौ तुदतः । अहं स्पृशामि । आवां तिष्ठावः । वयं सृजामः । बालिका: क्रन्दति । सिंहौ खादतः । मृगाः बिभ्यति । वायवः वान्ति । अहं यच्छामि । आवां भरावः । वयं घातयामः । चौरः चोरयति । गुरू पाठयतः । भटौ जयतः । हरिणाः धावन्ति । मनुजौ पततः । अहम् त्यजामि । अनुजाः भ्रमन्ति । भृङ्गाः पीडयन्ति । अहं मुञ्चामि । आवां क्षिपावः । वयं लिखामः । अहं सीदामि । आवां धावावः । वयं नमामः ।

४.७. उत्तमपुरुषे परिवर्तनं कुरुत ।

सः पठति । तौ हसतः । ते प्रविशन्ति । त्वं लिखसि । युवां धावथः । यूयं चलथ । रामः याचति । देवौ वदतः । त्वं नमसि । युवां सृजथः । यूयं लिम्पथ । गुरवः पाठयन्ति । छात्रौ पठतः । ते त्यजन्ति । त्वं हससि । बालिकाः रुदन्ति । युवां नयथः । यूयं जयथ । युवां वाञ्छथः । छात्राः लिखन्ति । मुनयः तपन्ति । सा वदति । ते लिम्पन्ति । शिक्षकः पाठयति । मणयः त्रुटन्ति । मनुजाः शोचन्ति । नाविकः तरति । यतयः भजन्ति । कवी सृजतः । सिंहाः गर्जन्ति । त्वं नमसि । युवां जिघ्रथः । यूयं भ्रमथ । एते कथयन्ति । त्वं काङ्क्षसि । युवां क्रीडथः । यूयं स्खलथ । भटाः रक्षन्ति । एतौ क्षिपतः । खलः निन्दति । मेषाः धावन्ति । ते वदन्ति । त्वं क्रुध्यसि । युवां कुप्यथः । यूयं चिन्तयथ । कृषकः सिञ्चति । वानरौ आरोहतः ।

४.८. कोष्ठस्थधातून्यनुसृत्य रिक्तस्थानं पूरयत ।

१	रामः ... ... (स्पृश्)	२	सीता ... ...(खाद्)
३	हरिः ... ... (गै)	४	रमे ... ... (क्रीड्)
५	बालिकाः ... ... (पठ्)	६	त्वं ... ... (लिख्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७	युवां ... ... (नम्)	८	यूयं ... ... (भ्रम्)
९	अहं ... ... (हस्)	१०	आवां ... ...(वद्)
११	वयं ... ... (सद्)	१२	केशवः ... ... (भी)
१३	सिंहः ... ... (हन्)	१४	भटाः ... ...(जि)
१५	अहम् ... ... (स्था)	१६	त्वं ... ... (क्रुध्)
१७	व्याघ्रौ ... ... (गर्ज्)	१८	कवयः ... ... (सृज्)
१९	भृङ्गाः ... ... (गुञ्ज्)	२०	हरयः ... ... (गर्ज्)
२१	वृद्धौ ... ... (स्खल्)	२२	मूर्खाः ... ... (निन्द्)
२३	हरिणाः ... ... (धाव्)	२४	त्वं ... ...(भज्)
२५	युवां ... ... (कथ्)	२६	यूयं ... ... (सिञ्च्)
२७	मूर्खौ ... ... (तुद्)	२८	फले ... ... (पत्)
२९	वयं ... ... (पा)	३०	एते ... ... (पा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमपाठः

प्रथमपुरुषे-	ए.	रामः	लभते ।
	द्वि.	रामौ	लभेते ।
	ब.	रामाः	लभन्ते ।
मध्यमपुरुषे-	ए.	त्वं	लभसे ।
	द्वि.	युवां	लभेथे ।
	ब.	यूयं	लभध्वे ।
उत्तमपुरुषे-	ए.	अहं	लभे ।
	द्वि.	आवां	लभावहे ।
	ब.	वयं	लभामहे ।

५.१. अधोलिखितवाक्यानि पठत ।

सः लभते । तौ लभेते । ते लभन्ते । सीता लभते । सीते लभेते । सीताः लभन्ते । हरिः लभते । हरी लभेते । हरयः लभन्ते । रामः वर्धते । रामौ वर्धेते । रामाः वर्धन्ते । नदी वर्धते । नद्यौ वर्धेते । नद्यः वर्धन्ते । माता वर्तते । मातरौ वर्तेते । मातरः वर्तन्ते । भ्राता सेवते । भ्रातरौ सेवेते । भ्रातरः सेवन्ते । तारका प्रकाशते । तारके प्रकाशेते । तारकाः प्रकाशन्ते । राजा यतते । राजानौ यतेते । राजानः यतन्ते । त्वं पचसे । युवां पचेथे । यूयं पचध्वे । अहं सहे । आवां सहावहे । वयं सहामहे ।

५.२. बहुवचने परिवर्तनं कुरुत ।

श्यामः वर्धते । रामौ एधेते । फले वर्तेते । ज्ञानं वर्धते । सः यतते । भृत्यः सेवते । मृगौ कम्पेते । बालिका नयते । सीते पचेते । हरी मन्येथे । आवां खिद्यावहे । युवां रमेथे । ते वर्धेते । नार्यौ उपक्रमेते । मृगः निलयते । अनुजः संगच्छते । कार्यं संपद्यते । राधे प्रतिपद्येते । मूर्खः विप्रतिपद्यते । वृक्षौ उत्पद्येते । श्यामः कुरुते । सा निवर्तते । तौ व्यावर्तेते । कालिका शेते । अहम् अनुशये । कविः क्रीणीते । बालकौ प्रेक्षेते । परीक्षकः परीक्षते । सः उपेक्षते । भावकः समीक्षते । तौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतीक्षेते । बालौ शयाते । अहं श्रये । आवां यतावहे । त्वं सहसे । युवां समीक्षेथे । अहं खिद्ये । आवां नमावहे । सः रमते ।

५.३. द्विवचने परिवर्तनं कुरुत ।

रामः सेवते । तारकाः द्योतन्ते । सा कम्पते । एताः निवर्तन्ते । मूढाः विप्रतिपद्यन्ते । बालकाः जायन्ते । लता जायते । फलानि पचन्ते । वयं यतामहे । यूयं मन्यध्वे । हरिः सहते । भृत्याः सेवन्ते । अहं नये । वयं कुर्महे । एते रमन्ते । सूर्यः प्रकाशते । बालिकाः वर्धते । त्वं कुरुषे । यूयं सेवध्वे । अहं कुर्वे । वयं सहामहे । सा यतते । मृगाः प्रेक्षन्ते । बालकाः शेरते । त्वं निवर्तसे । यूयं एधध्वे । वयं यतामहे । नारी अनुशेते । परीक्षकाः परीक्षन्ते । बुधाः समीक्षन्ते । अर्जुनः गणयते । वयं गवेषयामहे । ते जुगुप्सन्ते । त्वं जृम्भसे । यूयं तर्जध्वे । ताः तितिक्षन्ते । वयं जपामहे । युवानः त्वरन्ते । वयं दध्महे । त्वं चर्चयसे । ते पराक्रमन्ते ।

५.४. एकवचने परिवर्तनं कुरुत ।

तौ लभेते । ताः खिद्यन्ते । ते जुगुप्सेते । वयं जृम्भामहे । तौ तर्जेते । भृत्यौ सेवेते । मानवाः लभन्ते । युवां तितिक्षेथे । वयं त्वरामहे । सा गणयते । तौ प्रकाशेते । यूयं रमध्वे । मीनाः प्लवन्ते । केशवौ ब्रुवाते । बालकाः भजन्ते । आवां संभाषावहे । भिक्षुकाः भिक्षन्ते । शिखराणि भ्राजन्ते । वयं मीमांसामहे । युवकाः यतन्ते । याचकाः याचन्ते । बालकाः आरभन्ते । वयं रोचामहे । स्त्रियः लज्जन्ते । वयं परीक्षामहे । युवां वन्देथे । वयं वस्महे । ते व्यथन्ते । ताः शङ्कन्ते । शिक्षकाः शिक्षन्ते । बालाः शेरते । पर्वताः शोभन्ते । नार्यः सूयन्ते । वृक्षाः स्पन्दन्ते । वयं विष्मयामहे । वस्त्राणि स्रंसन्ते ।

५.५ कोष्ठस्थधातून्यनुसृत्य रिक्तस्थानं पूरयत ।

१) एतौ .... (वेप्)	२) सा ... . (तर्ज्)
३) ते .... (व्यथ्)	४) मूढाः .... (शङ्क्)
५) युवकाः .... (यत्)	६) तारकाः .... (द्युत्)
७) वयं .... (याच्)	८) तौ .... (प्लव्)
९) यूयं .... (त्रप्)	१०) सा .... (त्वर्)
११) बाला .... (जृम्भ्)	१२) ताः .... (रम्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३) याचकः .... (याच्)	१४) युवां .... (नि-वृत्)
१५) तौ .... (तिज्)	१६) युवानः .... (आ-रभ्)
१७) यूयं .... (पा)	१८) ते .... (गवेष्)
१९) मुनयः .... (भ्रम्)	२०) पितरः .... (ब्रू)
२१) यूयं .... (सिञ्च्)	२२) बालाः .... (शी)
२३) बालिका .... (जन्)	२४) भृत्याः .... (सेव्)
२५) ते .... (वस्)	२६) नार्यः .... (लज्ज्)
२७) वृक्षौ .... (स्पन्द्)	२८) एते .... (कृ)
२९) वयम् .... (मन्)	३०) भावकौ .... (सम्-ईक्ष्)
३१) यूयं .... (प्र-ईक्ष्)	३२) वयम् .... (लभ्)
३३) युवाम् .... (नन्द्)	३४) त्वम् .... (वृध्)
३५) अहम् .... (रम्)	३६) ते .... (वृत्)
३७) नार्यः .... (सह्)	३८) तारके .... (प्र-काश्)
३९) नेतारः .... (नी)	४०) त्वं .... (पच्)
४१) मूढाः .... (विप्रति-पद्)	४२) मृगाः .... (नि-वृत्)
४३) चन्द्रः .... (भ्राज्)	४४) चौराः .... (परा-अय्)
४५) शिक्षकौ .... (शिक्ष्)	४६) वयं .... (उप-क्रम्)
४७) त्वं .... (परि-ईक्ष्)	४८) यूयं .... (आ-लोच्)
४९) युवां .... (मन्)	५०) ते .... (वि-क्री)
५१) वयं .... (सम्-ईह्)	५२) कार्याणि .... (सं-पद्)
५३) वयं .... (वेप्)	५४) नेता .... (भाष्)
५५) वृक्षाः .... (एध्)	५६) पक्षिणः .... (उत्-डी)
५७) वयं .... (श्लाघ्)	५८) महान्तः .... (आस्)
५९) मूर्खाः .... (वञ्च्)	६०) वयं .... (परि-धा)

५.६. निषेधार्थकवाक्येषु प्रश्नार्थकवाक्येषु च परिवर्तनं कुरुत।

(५.१, ५.२, ५.३, ५.४)

५.७ वाक्येषु प्रयोगं कुरुत।

लभते। वर्धते। वर्तन्ते। सेवेथे। यतेथे। पचध्वे। सहे। कम्पते। उत्पद्यते। समीक्षते। शेरते। तितिक्षसे। प्रतीक्षते। संभाषते। भ्राजन्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठपाठः

प्रथमपुरुषे-	एकव.	सः	अपठत्
	द्विव.	तौ	अपठताम्
	बहुब.	ते	अपठन्
मध्यमपुरुषे-	एकव.	त्वम्	अपठः
	द्विव.	युवाम्	अपठतम्
	बहुव.	यूयम्	अपठत
उत्तमपुरुषे-	एकव.	अहम्	अपठम्
	द्विव.	आवाम्	अपठाव:
	बहुव.	वयम्	अपठाम:

६.१. अधोलिखितवाक्यानि पठत ।

रामः अधावत् । रामौ अधावताम् । रामाः अधावन् । त्वं अधावः । युवाम् अधावतम् । यूयम् अधावत । अहम् अधावम् । आवाम् आधावाव । वयम् अधावाम । सीता अजिघ्रत् । सीते अजिघ्रताम् । सीताः अजिघ्रन् । त्वम् अजिघ्रः । युवाम् अजिघ्रतम् । यूयम् अजिघ्रत । अहम् अजिघ्रम् । आवाम् अजिघ्राव । वयम् अजिघ्राम । हरिः अपश्यत् । हरी अपश्यताम् । हरयः अपश्यन् । त्वम् अपश्यः । युवाम् अपश्यतम् । यूयम् अपश्यत । अहम् अपश्यम् । आवाम् अपश्याव । वयम् अपश्याम । गुरुः अवदत् । गुरू अवदताम् । गुरवः अवदन् । नदी अवहत् । नद्यौ अवहताम् । नद्यः अवहन् । राजा अगच्छत् । राजानौ अगच्छताम् । राजानः अगच्छन् । त्वम् अगच्छः । युवाम् अगच्छतम् । यूयम् अगच्छत । अहम् अगच्छम् । आवाम् अगच्छाव । वयम् अगच्छाम ।

६.२ निम्नप्रश्नानामुत्तराणि लिखत ।

१. रामः किम् अकरोत् ? २. रामौ किम् अकुरुताम् ? ३. रामा किम् अकुर्वन् ? ४. अहम् किम् अकरवम् ? ५. आवां किम् अकरवाव ? ६. वयम् किम् अकरवाम ? ७. त्वं किम् अकरोः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८. युवाम् किम् अकुरुतम् ? ९. यूयम् किम् अकुरुत ? १०. सीता किम् अकरोत् ? ११. सीते किम् अकुरुताम् ? १२ सीताः किम् अकुर्वन् ? १३. कः अपश्यत् ? १४. कौ अपश्यताम् ? १५. के अपश्यन् ? १६. कः अवदत् ? १७. कौ अवदताम् १८. के अवदन् ? १९. का अवहत् ? २०. के अवहताम् ? २१. काः अवहन् ? २२. कः अगच्छत् ? २३. कौ अगच्छताम् ? २४. के अगच्छन् ?

६.३. अधोलिखितवाक्यानां वर्तमाने (लटि) परिवर्तनं कुरुत ।

श्यामः अपठत् । बालाः अगच्छन् । ते अभवन् । त्वम् अक्रन्दः । काः अहसन् । रमे अक्रीडताम् । अहम् अवदम् । रजकाः अक्षालयन् । वानराः अकुप्यन् । त्वम् अकाङ्क्षः । ते अचिकित्सन् । खगाः अकूजन् । वयम् अकृन्ताम । कृषकाः अकर्षन् । त्वम् अकिरः । ते अक्रन्दन् । वयम् अक्रीणाम । त्वम् अक्रोशः । सिंहाः अक्लिश्यन् । युवाम् अक्षिपतम् । वयम् अक्षुध्याम । मूषकाः अखनन् । व्याघ्रौ अखादताम् । त्वम् अगणयः । मक्षिकाः अगुञ्जन् । युवाम् अगुम्फतम् । ते अघोषयन् । सीते अचरताम् । गावः अचर्वन् । बालौ अक्रीडताम् । केशवः अचिनोत् । नायकः अचुम्बत् । तौ अचोरयताम् । ते अछादयन् । तौ अवपताम् । रामः अजपत् । खगाः अजीवन् । ते आज्ञापयन् । अग्नयः अज्वलन् । ताः अटङ्कयन् । सूर्यः अतपत् । छात्राः अतर्कयन् । पितरः अतर्जयन् । मूढाः अतुदन् । मत्स्याः अतृप्यन् । हारः अत्रुटत् । मशकाः अदशन् । ते अद्रुह्यन् । खलौ अनिन्दताम् । केशवौ अपूजयताम् । वयम् अपृच्छाम । युवाम् अभर्त्सयतम् । सः अभृज्जत् । श्यामौ अमार्जयताम् । ते अमुञ्चन् । तौ अमूर्छताम् ।

६.४. भूतकाले (लङि) परिवर्तनं कुरुत ।

सः मुञ्चति । तौ मूर्छतः । त्वम् सृजसि । तौ यजतः । ते यच्छन्ति । त्वम् यासि । ते याचतः । अश्वाः धावन्ति । वयं रक्षामः । युवाम् रचयथः । यूयम् रञ्जयथ । तौ लिम्पतः । वयं लुनीमः । ते वाञ्छन्ति । सः वेत्ति । रामाः व्रजन्ति । हंसौ तरतः । श्यामाः शक्नुवन्ति । अहम् स्नामि । आवाम् स्निह्यावः । लता क्षुभ्यति । बालकाः विकीरन्ति । त्वम् क्रन्दसि । युवाम् गायथः । त्वम् ग्रससि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तौ जिघ्रत: । ते चर्वन्ति । जलम् च्योतति । ते वमन्ति । मुनय: जपन्ति । जनक: जीर्यति । अग्नय: ज्वलन्ति । स्त्रिय: टङ्कयन्ति । अहम् तनोमि । आवां तर्जयाव: । वयं तेजयाम: । पितर: तृप्यन्ति । वयं जपाम: । सीता त्रोटयति । नृप: दण्डयति । वन्हि: दहति । तारके भात: । त्वम् उपदिशसि । ते निर्दिशन्ति । हिमम् द्रवति । बालका: उपद्रवन्ति । तौ द्रुह्यत: । आवाम् दध्व: । घटिके ध्वनत: । वयं ध्यायाम: । त्वं लिखसि । भ्रातर: पश्यन्ति । वयं लिम्पाम: । ते लिखन्ति । वानरा: कुप्यन्ति । बुधा: पठन्ति । मूषकौ प्रविशत: ।

६.५. पच्-मूर्छ्-दा-धाव्-लूञ्-कृ-गै-तृप्-मुच्-द्रु-पा-दृश्धातूनां लटि लङि च रूपाणि लिखत ।

६.६ निषेधार्थकवाक्येषु परिवर्तनं कुरुत ।

(६.१, ६.३ द्रष्टव्यम्)

६.७ प्रश्नार्थकवाक्येषु परिवर्तनं कुरुत

(६.३, ६.४ द्रष्टव्यम्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तमपाठः

प्रथमपुरुषे-	एकव.	सः	अलभत
	द्विव.	तौ	अलभेताम्
	बहुव.	ते	अलभन्त
मध्यमपुरुषे-	एकव.	त्वम्	अलभथाः
	द्विव.	युवाम्	अलभेथाम्
	बहुव	यूयम्	अलभध्वम्
उत्तमपुरुषे-	एकव.	अहम्	अलभे
	द्विव.	आवाम्	अलभावहि
	बहुव.	वयम्	अलभामहि

७.१. अधोलिखितवाक्यानि पठत।

श्यामः अलभत। रामौ अवर्धेताम्। उमेशाः अवर्तन्त। त्वम् अरमथाः। युवाम् असहेथाम्। यूयम् अमन्यध्वम्। सः अखिद्यत। तौ अवर्तेताम्। ते अवर्धन्त। त्वं अयतथाः। युवाम् अत्रपेताम्। सा अत्वरत। बाला अजृम्भत। याचकौ अयाचेताम्। ते न्यवर्तन्त। त्वं अतितिक्षथाः। युवकाः आरभन्त। ऋषयः अभजन्त। बालिका अजायत। वयम् अमन्यावहि। नार्यः अलज्जन्त। अहं प्रारेभे। ते अशेरन्त। बालकाः असेवन्त। तारके प्राकाशेताम्। त्वम् अलज्जथाः। वृक्षौ अस्पन्दताम्। पर्वताः अभ्राजन्त। सूर्यः अद्योतत। लताः अवेपन्त। हिमम् अशोभत।

७.२ भूतकाले परिवर्तनं कुरुत।

(५.१, ५.२, ५.३, ५.४, ६.१ द्रष्टव्यम्)

७.४ कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानं पूरयत।

१) रामः ... ... (अ+त्रप्)

२) सीते ... ... (अ+लभ्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३) रामाः	(अ+तर्ज्)
४) त्वं	(अ+वृध्)
५) यूयम्	(अ+ब्रू)
६) युवाम्	(अ+सेव्)
७) अहम्	(अ+कथ्)
८) आवाम्	(अ+त्वर्)
९) वयम्	(अ+भज्)
१०) तारकाः	(प्र-अ+काश्
११) चन्द्रः	(अ+द्युत्)
१२) वनम्	(अ+शोभ्)
१३) नार्यः	(अ+सू)
१४) आवाम्	(अ+पठ्)
१५) युवाम्	(अ+वन्द्)
१६) तारके	(अ+भ्राज्)
१७) त्वम्	(अ-नी)
१८) चौराः	(अ-धाव्)
१९) शिक्षकौ	(अ-शिक्ष्)
२०) यूयम्	(अ-श्लाघ्)
२१) छात्राः	(अ-यत्)
२२) तौ	(प्र-अ-रभ्)
२३) त्वम्	(अ-रुच्)
२४) भ्रातरः	(सम्-अ-गम्)
२५) नेतारः	(अ-भाष्)
२६) कार्याणि	(सम्-अ-पद्)
२७) वृक्षाः	(अ-स्पन्द्)
२८) लते	(अ-वृत्)
२९) अहम्	(अ-कृ)
३०) वयम्	(अ-शृ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमपाठः

प्रथमपुरुषे-	एकव.	सः	पठिष्यति/	लप्स्यते ।
	द्विव.	तौ	पठिष्यतः/	लप्स्येते ।
	बव.	ते	पठिष्यन्ति/	लप्स्यन्ते ।
मध्यमपुरुषे-	एकव.	त्वम्	पठिष्यसि/	लप्स्यसे ।
	द्विव.	युवाम्	पठिष्यथः/	लप्स्येथे ।
	बहुव.	यूयम्	पठिष्यथ/	लप्स्यध्वे ।
उत्तमपुरुषे-	एकव.	अहं	पठिष्यामि/	लप्स्ये ।
	द्विव.	आवाम्	पठिष्यावः/	लप्स्यावहे ।
	बहुव.	वयम्	पठिष्यामः/	लप्स्यामहे ।

८.१. अधोलिखितवाक्यानि पठत ।

रामः लेखिष्यति । तौ वदिष्यतः । ते हसिष्यन्ति । त्वं धाविष्यसि । युवां रक्षिष्यथः । यूयं क्रीडिष्यथ । अहं गमिष्यामि । आवाम् आगमिष्यावः । वयं पतिष्यामः । सीता नर्तिष्यति । रमे दास्यतः । विमला भेष्यति । त्वं विधास्यसि । युवां हास्यथः । यूयं धास्यथ । अहम् आप्स्यामि । केशवः शक्ष्यति । रामौ धाविष्यतः । अर्जुनाः चेष्यन्ति । त्वं मोक्ष्यसि । युवां सेक्ष्यथः । यूयं तर्पिष्यथ । गोविन्दः प्रक्ष्यति । दिनेशौ प्रक्ष्यतः । उमेशाः प्रक्ष्यन्ति । रामौ भोक्ष्येते । देवाः ग्रहीष्यन्ते । युवां नुत्स्यथः । माता पक्ष्यते । जनकः पालयिष्यते । वयं वर्धिष्यामहे । पण्डिताः भोत्स्यन्ते । तौ भर्त्सयिष्येते । ते भाषिष्यन्ते । सः मनिष्यते । तौ भञ्जयिष्येते ।

८.२. निम्नप्रश्नानामुत्तराणि लिखत ।

१. रामः किं करिष्यति ? २. तौ किं करिष्यतः ? ३. ते किं करिष्यन्ति ? ४. अहम् किं करिष्यामि ? ५. आवां किं करिष्यावः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६. वयम् किं करिष्यामः ? ७. त्वं किं करिष्यसि ? ८. युवां किं करिष्यथः ? ९. यूयम् किं करिष्यथ ? १०. का नर्तिष्यति ? ११. के दास्यतः ? १२. का भेष्यति ? १३. कः शक्ष्यति ? १४. कौ धाविष्यतः ? १५. के चेष्यन्ति ? १६. कः प्रक्ष्यति ? १७. कौ प्रक्ष्यतः ? १८. के प्रक्ष्यन्ति ? १९. के ग्रहीष्यन्ति ? २०. का पक्ष्यते ? २१. कः पालयिष्यते ? २२. के भोत्स्यन्ते ?

८.३. भूतकाले वर्तमानकाले च परिवर्तनं कुरुत ।

(द्र. ८.१)

८.४. भविष्यत्काले परिवर्तनं कुरुत ।

(द्र. ४.१, ४.२, ४.३, ४.४, ४.५, ४.६, ४.७, ५.१, ५.२, ५.३, ५.४, ६.१, ६.२, ६.३, ७.१)

८.५. कोष्ठस्थधातून्यनुसृत्य भविष्यत्काले रिक्तस्थानं पूरयत ।

१) रामः ... ... (पठ्)	छात्राः ... ... (भाष्)
२) श्यामौ ... ... (लभ्)	गर्दभः ... ... (वह्)
३) सीताः ... ... (सह्)	पितामहः ... ... (गम्)
४) त्वं ... ... (तर्ज्)	पितृव्यः ... ... (बुध्)
५) युवां ... ... (शी)	भ्रातृजाया ... ... (पच्)
६) यूयं ... ... (वृत्)	भ्रात्रीयः ... ... (क्रीड्)
७) विमला ... ... (यत्)	मातुलः ... ... (दृश्)
८) पार्वत्यौ ... ... (ब्रू)	मातुलानी ... ... (स्निह्)
९) हरयः ... ... (गर्ज्)	सहोदरः ... ... (कुप्)
१०) आदित्यः .. (प्र-काश्)	स्नुषा ... ... (लज्ज्)
११) राजानौ ... .. (जि)	श्वसुरः ... ... (चल्)
१२) सखायः ... ... (मिल्)	पुत्रौ ... ... (ग्रह्)
१३) चमर्यो ... ... (खाद्)	पुत्र्यः ... ... (रुध्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१४) मूषकः ... ... (भक्ष्)	जामाता ... ... (लिख्)
१५) धावकौ ... ... (धाव्)	परिचारिकाः ... ... (सेव्)
१६) याचकाः ... ... (याच्)	भृत्यः ... ... (ईक्ष्)
१७) तारकाः ... ... (द्युत्)	वयस्यः ... ... (ज्ञा)
१८) ग्रहाः ... ... (भ्राज्)	रिपुः ... ... (भी)
१९) वानरौ ... ... (आ-रुह्)	भागिनेयः ... ... (मान्)

८.६ परस्परं मेलयत ।

क	ख			
सः	पठिष्यति	धाविष्यतः	दास्यन्ति	प्रेक्ष्ये
तौ	पक्ष्यते	सेक्ष्येथे	भाषिष्यन्ते	पलायिष्यावहे
ते	ग्रहीष्यते	भर्त्सयिष्यसे	विधास्यतः	चेष्यामः
त्वम्	पतिष्यति	लेखिष्यतः	धास्यथ	दास्यामि
युवाम्	द्योतते	मोक्ष्यथः	सेक्ष्यथ	भाषिष्ये
यूयम्	भोत्स्यते	प्रेक्ष्यन्ते	शक्ष्यति	नुत्स्यथ
अहम्	धाविष्यामहे	ग्रहीष्यन्ते	लज्जसे	भविष्यामि
आवाम्	लप्स्यध्वे	गमिष्यामः	प्राप्स्यामि	कथयिष्यति
वयम्	नर्तिष्यति	वदिष्यतः	शक्ष्यावः	विधास्यामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवमपाठः

(क) परस्मैपदे -

प्रथमपुरुषे-	एकव.	सः	पठतु ।
	द्विव.	तौ	पठताम् ।
	बहुव.	ते	पठन्तु ।
मध्यमपुरुषे-	एकव.	त्वं	पठ ।
	द्विव.	युवां	पठतम् ।
	बहुव.	यूयं	पठत ।
उत्तमपुरुषे-	एकव.	अहं	पठानि ।
	द्विव.	आवां	पठाव ।
	बहुव.	वयं	पठाम ।

(ख) आत्मनेपदे -

प्रथमपुरुषे-	एकव.	सः	लभताम् ।
	द्विव.	तौ	लभेताम् ।
	बहुव.	ते	लभन्ताम् ।
मध्यमपुरुषे-	एकव.	त्वं	लभस्व ।
	द्विव.	युवाम्	लभेथाम् ।
	बहुव.	यूयम्	लभध्वम् ।
उत्तमपुरुषे-	एकव.	अहम्	लभै ।
	द्विव.	आवाम्	लभावहै ।
	बहुव.	वयम्	लभामहै ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९.१. अधोलिखितवाक्यानि पठत ।

सः गच्छतु । तौ गच्छताम् । ते गच्छन्तु । त्वं गच्छ । युवां गच्छतम् । यूयं गच्छत । अहम् गच्छानि । आवां गच्छाव । वयं गच्छाम । रामः भ्रमताम् । तौ भ्रमेताम् । ते भ्रमन्ताम् । त्वं भ्रमस्व । युवां भ्रमेथाम् । यूयं भ्रमध्वम् । अहं भ्रमै । आवां भ्रमावहै । वयं भ्रमामहै । सः सहताम् । तौ सहेताम् । ते सहन्ताम् । त्वं सहस्व । युवां सहेथाम् । यूयं सहध्वम् । अहं सहै । आवां सहावहै । वयं सहामहै । केशवः आरभताम् । केशवौ आरभेताम् । केशवाः आरभन्ताम् । त्वं आरभस्व । युवाम् आरभेथाम् । यूयम् आरभध्वम् । अहम् आरभै । आवाम् आरभावहै । वयम् आरभामहै । हरिः रमताम् । हरी रमेताम् । हरयः रमन्ताम् । त्वं रमस्व । युवाम् रमेथाम् । यूयम् रमध्वम् । अहं रमै । आवाम् रमावहै । वयं रमामहै ।

९.२ आज्ञार्थकवाक्ये (लोटि) परिवर्तनं कुरुत ।

(द्र. ४.१, ४.२, ४.३, ४.४, ४.५, ४.६, ४.७, ५.१, ५.२, ५.३, ५.४, ६.३)

९.३ निम्न-पदानि प्रयुज्य वाक्यानि रचयत ।

१	२	३	४	५	६	७	८	९	१०
एकः	द्वौ	त्रयः	चत्वारः	पञ्च	षट्	सप्त	अष्ट	नव	दश
एका	द्वे	तिस्रः	चतस्रः	पञ्च	षट्	सप्त	अष्ट	नव	दश
एकम्	द्वे	त्रीणि	चत्वारि	पञ्च	षट्	सप्त	अष्ट	नव	दश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमपाठः

(कर्मणि द्वितीया)

प्रथमपुरुषे-	एकव.	रामः	पाठम्	पठति ।
	द्विव.	रामौ	पाठौ	पठतः ।
	बहुव.	रामाः	पाठान्	पठन्ति ।
मध्यमपुरुषे-	एकव.	त्वं	पाठान्	पठसि ।
	द्विव.	युवाम्	पाठौ	पठथः ।
	बहुव.	यूयम्	पाठान्	पठथ ।
उत्तमपुरुषे-	एकव.	अहं	पाठम्	पठामि ।
	द्विव.	आवां	पाठौ	पठावः ।
	बहुव.	वयं	पाठान्	पठामः ।

१०.१ अधोलिखितवाक्यानि पठत ।

स पुस्तकं पठति । गुरुः विद्यालयं गच्छति । अनुजौ फले खादतः । भ्रातरः कार्यं कुर्वन्ति । नृपः प्रजां रक्षति । वयम् आम्रफलानि खादामः । ते मृद्वीके खादतः । यूयं मोदकं काङ्क्षथ । पौत्रः अक्षोटफलं वाञ्छति । ते पुगिफलम् इच्छन्ति । भृत्यः स्वामिनं सेवते । छात्राः पुस्तकानि धारयन्ति । भागिनेयः तक्रं पिबति । बालकाः दुग्धं पिबन्ति । छात्रौ आज्ञां पालयतः । अनुजा पत्रिकाम् नयति । सिंहः मृगान् हन्ति । मूढाः विवादं कुर्वन्ति । अग्नयः काष्ठानि दहन्ति । बकः मत्स्यान् धत्ते । वृकाः महिषान् घातयन्ति । भगिन्यः पूपं पचन्ति । माता पायसं ददाति । भृत्यौ दुग्धम् आनयतः । कः रोटिकां न इच्छति ? वयं कार्यं प्रारभामहे । माता पुत्रं स्निह्यति । त्वम् अपराधं न सहसे । आवां सुकृत्यम् आचरावः । वयम् ईश्वरं नमामः । भल्लूकाः बदरीफलं भक्षयन्ति । यूयम् तान् पाठयथ । सा रम्भां न खादति । लोकसेवायोगः कर्मकरान् नियुङ्क्ते । पत्रवाहकः द्विचक्रिकां चालयति । तक्षकः तक्षां रचयति । ते जम्बूरसं पिबन्ति । वयं विद्यालयं गच्छामः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०.२ कोष्ठानुसारं कर्मपदानि लिखत ।

सः (पाठ) पठति ।	तौ (कार्य) कुरुतः ।
ते (चलचित्र) पश्यन्ति ।	अहं (कन्दुक) क्रीडामि ।
आवां (द्रव्य) याचावः ।	वयं (पाद) स्पृशामः ।
बालकः (पत्र) लिखति ।	चौरौ (रूप्यक) हरतः ।
आवां (अश्रु) मुञ्चावः ।	बालिके (प्राङ्गण) लिम्पतः ।
विष्णू (नदी) तरतः ।	कृषकाः (क्षेत्र) खनन्ति ।
ते (जल) पिबन्ति ।	सः (भृत्य) तर्जति ।
चौराः (भाण्ड) चोरयन्ति ।	गर्दभौ (भार) वहतः ।
त्वं (छात्र) पाठयसि ।	हरिः (कार्य) अकरोत् ।
कवी (काव्य) असृजताम् ।	मुनयः (मन्त्र) अजपन् ।
तौ (पत्र) अलिखताम् ।	त्वं (पुस्तक) अपठः ।
यूयं (पारितोषिक) लभध्वे ।	अहम् (चित्र) अपश्यम् ।
आवां (कथा) शृणुवः ।	वयं (छात्र) शिक्षामहे ।
त्वं (अन्न) भिक्षसे ।	केशवः (भिक्षा) याचते ।
सः (अस्मद्) ताडयति ।	तौ (युष्मद्) पीडयतः ।
सीता (तत्) स्निह्यति ।	शुकः (तत्) अनुकरोति ।
महात्मानः (स्वर्गति) प्रार्थयन्ते ।	छात्रौ (पाठ) अभ्यस्यतः ।
सः (धूर्त) निरस्यति ।	रजः (आकाश) व्याप्नोति ।
त्वं (अस्मद्) किङ्करम् अवेहि ।	सः (स्वामिन्) अभ्येति ।
सेवकः (स्वामिन्) अन्वेति ।	चातकः (पयोघर) प्रार्थयते ।
अलसः (कर्तव्य) उपेक्षते ।	किमर्थं (अस्मद्) तिरस्करोषि ।
ते (सत्यमार्ग) अनुसरन्ति ।	शिवः (भक्त) उपकुरुते ।
रामः (भवन) अलङ्करिष्यति ।	कामः (चित्त) विकरोति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स (नदी) आगच्छत् ।	गुरुः (युष्मद्) अनुगृह्णाति ।
बालिकाः (कुसुम) अचिन्वन् ।	रामः (गङ्गा) उदतरत् ।
गुरुवः (विद्या) वितरन्ति ।	यूयं (स्थान) निर्दिशत ।
केशवः (वस्त्र) न परिदधाति ।	त्वम् (मित्र) अनुनय ।
युवाम् (सलिल) आनयतम् ।	सन्तः (सुख) अनुभवन्ति ।

१०.३ अधस्तनपदानां सकर्मकेषु वाक्येषु प्रयोगं कुरुत ।

व्याप्नोति । प्राप्नोति । समाप्नोति । उपैति । अत्येति । प्रेक्षते । परीक्षते । प्रतीक्षते । अनुकरोति । प्रक्षिपसि । आक्षिपसि । उत्क्षिपतः । संक्षिपसि । अनुगच्छति । आनयति । प्रहरन्ति । संहरतु । उपसंहरति । निर्दिशति । आदिशति । सन्दिशति । अपनयति । उद्गच्छति । पाठयति । कथयति । वादयति ! पश्यति । शृणोति । जिघ्रति । पिबन्ति । अलिखन् । अतरन् । नियुङ्क्ते ।

१०.४ अधोलिखितवाक्यानि पठत ।

विद्याम् अन्तरेण सुखं न भवति । त्वाम् ऋते अहं न जीवामि । केशवं विना धर्मः न जायते । गृहम् उत्तरेण तडागः अस्ति । भवनम् अभितः बाटिकाः सन्ति । ज्ञानिनं परितः भक्ताः निवसन्ति । पर्वतं सर्वतः वृक्षाः वर्तन्ते । वाग्वतीम् उभयतः तरवः विद्यन्ते । वाग्वतीं मनोहराम् च अन्तरा कोटेश्वरः अस्ति । वनस्थलीं निकषा विष्णुमती वहति । ग्रामं निकषा वनं विद्यते । वयं मासं निवसामः । क्रोशं नदी कुटिला वहति । पितरम् अनु पुत्राः गच्छन्ति । दीनं प्रति दयां कुरु । मूर्खजीवनं धिक् अस्ति । बालकः शय्याम् अधिशेते । रमेशः गृहम् अधितिष्ठति । श्री ५ वीरेन्द्रः सिंहासनम् अध्यास्ते । विष्णुः वैकुण्ठम् अनुवसति । वयं गृहम् उपवसामः । पशुपतिनाथः देवपत्तनम् अधिवसति । भक्ताः देवमन्दिरम् आवसन्ति । मनः धर्मम् अभिनिविषते । मृगः सत्वरं धावति ।

१०.५ प्रत्येकं दशवाक्येषु प्रयोगं कुरुत ।

शीघ्रम् । अभिनिविषते । आवसतः । अधिवसामः । उपवसथ । अध्यासते । अधितिष्ठसि । अध्यतिष्ठत् । अधिशेरते । धिक् । प्रति । अनु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मासम् । योजनम् । क्रोशम् । निकषा । समया । हा । परितः । अभितः । सर्वतः । उपरि । उभयतः । अधोऽधः । अन्तरा । अन्तरेण । विना । ऋते । उत्तरेण । पुरुषं पुरुषम् ।

१०.६ कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानं पूरयत ।

१) भिक्षुकाः .... याचन्ते (पुरुष पुरुष) ।

२) समुद्रः .... विद्यते (शतयोजन) ।

३) .... परितः प्राकाराः सन्ति (भवन) ।

४) .... अधोऽधः गङ्गा वहति (पर्वत) ।

५) नागरिकाः .... सर्वतः भ्रमन्ति (नगर) ।

६) .... धिक् अस्ति । (युस्मद्) ।

७) सिंहः .... अभियाति (करिन्) ।

८) .... अन्तरा मार्गः अस्ति (पुर, वन) ।

९) .... अन्तरेण कः जगत् प्रकाशयति (सूर्य) ।

१०) अहं .... ब्रह्मचर्यं चरामि (संवत्सर)

११) याचकाः .... भिक्षन्ते (गृह, गृह) ।

१२) .... अभितः नद्यौ वहतः (उपवन)

१३) .... उपर्युपरि पतङ्गाः उड्डीयन्ते (गगन) ।

१४) .... अनु शिष्याः अगच्छन् (गुरु) ।

१५) योद्धुम् .... अन्तरेण न कः अपि शक्नोति (सैनिक) ।

१६) .... अन्तरा केशवः तिष्ठति (युष्मद्, अस्मद्) ।

१७) केशवः .... अधिवसति (मञ्च) ।

१८) वयं .... अध्यास्महे (भूमि) ।

१९) ते .... अधिशेरते (धरणी) ।

२०) .... दक्षिणेन कौशिकी वहति (हिमालय) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०.७ संशोधयत ।

त्वम् खट्वायाम् अधिशेषे । भवनस्य परितः वाटिकाः सन्ति । गोष्ठस्य अभितः गावः सञ्चरन्ति । गुरोः निकषा छात्राः वसन्ति । भवनस्य समया नद्यः वहन्ति । छात्राः मासे आसते । क्रोशे गिरयः सन्ति । वाटिकायाः सर्वतः पुष्पाणि विकसन्ति । भिक्षुकाः जनाद् जनाद् याचन्ते । तव मम च अन्तरा कुड्यं नास्ति । कृष्णस्य उभयतः गोपालाः तिष्ठन्ति । मूर्खस्य धिक् अस्ति । गङ्गायाः यमुनायाः च अन्तरा प्रयागः वर्तते । शिष्याः आसनेषु अधितिष्ठन्ति । ब्राह्मणाः विष्टरेषु अध्यासते । ज्ञानस्य विना मानवः पशुः भवति । छात्राणाम् अन्तरेण गुरवः न तिष्ठन्ति । कृषकाः ग्रामे गच्छन्ति । ते वने यावत् धावन्ति । स्वामिनः अनु सेवकः गच्छति । दीनस्य प्रति दयां कुरु । नास्तिकाय धिक् यः ईश्वरलीलां न पश्यति ।

१०.८ अधोलिखितवाक्यानि पठत ।

गोपः गां पयः दोग्धि । दरिद्रः राजानं वस्त्रं याचते । राजपुरुषः चौरं शतं दण्डयति । गोपालकाः ब्रजम् गाः अवरुन्धन्ति । बालकः नरं मार्गं पृच्छति । बालिकाः लतां पुष्पाणि चिनोति । गुरुः शिष्यान् धर्मं ब्रूते । मुनिः ब्रह्मचारिणः धर्मं शास्ति । नृपतिः शत्रुं राज्यं जयति । देवाः सागरम् अमृतं मथ्नन्ति । चौरः धनिकं सहस्रं मुष्णाति । केशवः नगरं वृषभं नयति । स्तेनः कृपणं धनम् अहरत् । नराः वसुधां रत्नानि कर्षन्ति ।

१०.९ रिक्तस्थानेषु समुचितानि पदानि स्थापयत ।

१) माता .... पयः दोग्धि (गौ) ।

२) याचकः .... वस्त्रं याचते (धनिन्) ।

३) सः .... ओदनं पचति (तण्डुल) ।

४) राजा .... शतं दण्डयति (चौर) ।

५) सैनिकाः .... चौरान् अवरुन्धन्ति (कारागार) ।

६) वयं .... धर्मं पृच्छामः (धर्मशास्त्रिन्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७) ते .... पुष्पाणि चिन्वन्ति (वृक्ष) ।

८) नेता .... भाषणं भाषते (जन) ।

९) गुरुः .... धर्मं शास्ति (शिष्य) ।

१०) कार्यालयः .... शतं दण्डयति (युष्मद्) ।

११) माता .... घृतं मथ्नाति (दधि) ।

१२) ते .... महिषम् नयन्ति (ग्राम) ।

१३) स्तेनः .... सुवर्णम् अहरत् (गृह) ।

१४) कृषकाः .... अल्लुकं कर्षन्ति (क्षेत्र) ।

१५) केशवः .... काष्ठमण्डपम् अनयत् (पत्र) ।

१६) छात्राः .... पाठं पृच्छन्ति (गुरु) ।

१७) महाश्वेता .... अनामयम् अपृच्छत् (कादम्वरी) ।

१८) नृपाः .... रत्नानि दुदुहुः (धरित्री) ।

१९) मधुसूदनः........... वाक्यमवोचत् (शिव) ।

२०) गर्दभः .... भारं नयति (ग्राम) ।

१०.१० प्रत्येकं दशवाक्येषु प्रयोगं कुरुत ।

दुग्धः । धुक्षे । दुहन्ति । धोक्ष्यति । अयाचत् । याचते । याचिष्यति । पचति । पचते । अपचत् । दण्डयति । अदण्डयत् । दण्डयिष्यति । दण्डयतु । रुणद्धि । रुणत्सि । रुन्धे । अरुणत् । रोत्स्यन्ते । चिनोति । चिनोतु । अचिनोत् । चेष्यति । जयति । अजयत् । जयतु । जेष्यति । अजयन् । मथ्नाति । ब्रवीति । ब्रवीमि । उवाच । अवोचत् । वक्ष्यति । मुष्णन्ति । अमुष्णात् । नयसि । नयन्ते । नयताम् । नेष्यति । नयतु । हरतः । अहरताम् । हरिष्यन्ति । हरन्ताम् । कर्षति । अकर्षत् । कर्षतु । क्रक्ष्यति ।

१०.११ निम्न प्रश्नानाम् १०.१ पाठं विलोक्योत्तराणि लिखत ।

(१) सः किं पठति ? (२) गुरुः किं करोति ? (३) अनुजौ किं खादतः ? (४) भ्रातरः किं कुर्वन्ति ? (५) नृपः किं करोति ? (६) यूयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं खादथ ? (७) ते किं वाञ्छन्ति ? (८) वयं किं काङ्क्षामः ? (९) पौत्रः किं वाञ्छति ? (१०) भृत्यः कं सेवते ? (११) छात्राः किं धारयन्ति ? (१२) भगिनी किं करोति ? (१३) बालकाः किं कुर्वन्ति ? (१४) छात्रौ किं कुरुतः ? (१५) अनुजा किं नयति ? (१६) सिंहः कान् हन्ति ? (१७) मूढाः किं कुर्वन्ति ? (१८) के काष्ठं दहन्ति ? (१९) वकः किं धत्ते ? (२०) वृकाः कान् घातयन्ति ? (२१) भगिन्यः किं पचन्ति ? (२२) माता किं करोति ? (२३) भृत्यौ किम् आनयतः ? (२४) यूयं किं प्रारभध्वे ? (२५) माता कम् स्निह्यति ? (२६) कः अपराधं न सहते ? (२७) यूयं किम् आचरथ ? (२८) यूयं कं नमथ ? (२९) भल्लूकाः किं भक्षयन्ति ? (३०) वयं किं कुर्मः (३१) सा का न खादति ? (३२) कर्मकरं कः नियुङ्क्ते ? (३३) सचिवः किं चालयति ? (३४) तक्षकः किं करोति ? (३५) ते किं पिबन्ति ? (३६) यूयं कुत्र गच्छथ ?

१०.१२ कोष्ठस्थपदान्यनुसृत्योत्तरं लिखत ।

(उत्तरेषु सार्वनामिकपदानां प्रयोगः कर्तव्यः)

१) केशवः किं करोति ?	(पाठ, पठ्)
२) गुरू किं कुरुतः ?	(छात्र, पाठ)
३) ते किं कुर्वन्ति ?	(द्रविण, याच)
४) त्वं किं करोषि ?	(पत्र, लिख)
५) युवां किं कुरुथः ?	(कुसुम, चि)
६) यूयं किं कुरुथ ?	(क्षेत्र, कृष)
७) अहं किं करोमि ?	(द्विचक्रिका, चाल)
८) आवां किं कुर्वः ?	(पुष्प, घ्रा)
९) वयं किं कुर्मः ?	(जल, पा)
१०) त्वं कुत्र शेषे ?	(अधि-शी)
११) वाटिकाः कुत्र सन्ति ?	(परितः)
१२) युवां कुत्र वसथः ?	(निकषा)
१३) प्रयागः कुत्र वर्तते ?	(अन्तरा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१४) शिष्याः कुत्र वसन्ति ? (भूमि, अधि-स्था)
१५) कां विना मानवः पशुः भवति ? (विद्या)
१६) गोपालौ कुत्र तिष्ठतः ? (केशव, उभयतः)
१७) साधवः कं प्रति दयां कुर्वन्ति ? (दीन)
१८) नद्यौ कुत्र वहतः ? (ग्राम, समया)
१९) सेवकः कम् गच्छति ? (अनु)
२०) छात्राः कियद् दिनं पठन्ति ? (वर्ष)
२१) भक्ताः कुत्र वसन्ति ? (आ-वस्)
२२) सिंहाः कुत्र गर्जन्ति ? (सर्वतः)
२३) माता किं करोति ? (गौ, दुह)
२४) दरिद्रौ किं कुरुतः ? (धन, याच)
२५) पशुपतिः कुत्र वसति ? (देवपत्तन, अधि-वस)
२६) वाराङ्गनाः किं कुर्वन्ति ? (धनिक, धन, मुष्)
२७) राजा कुत्र आस्ते ? (सिंहासन, अधि-आस)
२८) पथिकः किं करोति ? (अस्मद्, पथिन्, प्रच्छ)

११.१३. निम्नवाक्यानि पठत ।

श्यामः कार्यं कृत्वा गच्छति । तौ वृक्षं छित्त्वा आगच्छतः । मित्रं निन्दित्वा मूर्खाः प्रसन्नाः भवन्ति । बालिकाः जलं नीत्वा गृहं यान्ति । छात्राः पाठं पठित्वा भवनं प्रत्यागच्छन्ति । त्वं तक्रं पीत्वा हृष्टः भवसि । कृषकाः गाः पालयित्वा दुग्धं विक्रीणन्ति । वृक्षाः पुष्पित्वा फलन्ति । युवत्यः जलं पूरयित्वा घटम् स्थापयन्ति । बालकः अञ्जलिं बद्ध्वा महेशं प्रार्थयते । वायसः तण्डुलकणान् भक्षयित्वा उदगच्छत् । त्वां मूर्खं मत्वा केशवः न अवोचत् । याचकाः प्रतिगृहं भ्रमित्वा द्रव्यम् अयाचन्त । माता दधि मथित्वा घृतम् आनयत् । युवां तं मन्त्रयित्वा गृहम् अगच्छतम् । यूयं कथां श्रुत्वा आगच्छत । अहं जीर्णवस्त्रं मुक्त्वा नवं वस्त्रम् अधारयम् । आवां यतित्वा साफल्यम् अलभावहि । वयं धनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लब्ध्वा हर्षम् अन्वभवाम । बालिका पत्रं लिखित्वा प्रेषयिष्यति । रामौ किम् उक्त्वा गमिष्यन्ति । मूढाः युष्मान् वञ्चयित्वा यास्यन्ति । त्वं मां श्लाघयित्वा किं विधास्यसि ? युवाम् ईश्वरं नत्वा पाठं पठिष्यथः । यूयं पशुपतिं स्तुत्वा पूजयथ । अहं मृगं हत्वा आनयिष्यामि । आवां कर्णौ स्पृष्ट्वा वदिष्यामः । वयम् छात्रान् सान्त्वयित्वा आगमिष्यामः । ते मां पृष्ट्वा गृहं यास्यन्ति । त्वम् जीर्णवस्त्राणि त्यक्त्वा आगच्छ । युवां पत्रं प्रेषयित्वा गच्छतम् । यूयं क्रीडित्वा आगच्छत । भवान् ईश्वरं नत्वा पठतु । तौ भगवन्तं स्मृत्वा कार्यं कुरुताम् । ते क्षेत्रफलं मित्वा प्रत्यागच्छन्तु ।

१०.१४. क्त्वाप्रत्ययान्तैः पदैः संयोजयत ।

१. राम: विद्यालयं गच्छति । स: पाठं पठति ।
२. त्वं पुस्तकानि पठसि । त्वं लेखं लिखसि ।
३. ते धर्मशास्त्रं पठन्ति । ते धर्मम् आचरन्ति ।
४. वयं गायामः । वयं नृत्यामः ।
५. नेतारः मञ्चं गच्छन्ति । ते भाषणं कुर्वन्ति ।
६. छात्राः चत्वरं गच्छन्ति । ते कन्दुकेन क्रीडन्ति ।
७. वानराः वृक्षम् आरोहन्ति । ते फलं खादन्ति ।
८. पूजकः मन्दिरं गच्छति । सः शिवम् अर्चयति ।
९. गुरवः विद्यालयं गच्छन्ति । ते छात्रान् पाठयन्ति ।
१०. अहं लेखम् लिखामि । अहं लेखं प्रकाशयामि ।
११. वयं मन्दिराणि पश्यामः । वयं आनन्दम् अनुभवामः ।
१२. कविः काव्यं सृजति । सः यशः लभते ।
१३. भावकः काव्यानि पठति । सः काव्यानि समीक्षते ।
१४. मेघाः गर्जनं कुर्वन्ति । ते जलं वर्षन्ति ।
१५. त्वं रामायणं शृणोषि। त्वं ज्ञानं लभसे ।
१६. वयं विभीमः । अतः वनं न गच्छामः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७. बालिका पुष्पाणि जिघ्रति । सा प्रसन्ना भवति ।
१८. छात्रः निबन्धं रचयति । सः पारितोषिकं लभते ।
१९. पिता धनम् अर्जयति । सः अस्मान् भरति ।
२०. ते शिवं पूजयन्ति । ते विद्यां याचन्ते ।
२१. धूमकेतुः सूर्यसमीपं गच्छति । सः प्रकाशते ।
२२. त्वं ज्यौतिषं पठसि । त्वं ग्रहगतिं गणयसि ।
२३. कालिदासः काव्यानि असृजत् । सः ख्यातिम् अलभत ।
२४. व्यासः भारतम् अरचयत् । सः पुराणानि असृजत् ।
२५. बालिका सरस्वतीं नमति । सा विद्याम् याचते ।

१०.१५ निम्नवाक्यानि पठित्वा तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

वालकः फलं प्राप्य सन्तुष्टः भवति । तौ धनम् उपार्ज्य आनन्दम् अनुभवतः । ते ईश्वरं प्रणम्य सुखम् इच्छन्ति । त्वं गृहं निर्माय तिष्ठसि । युवां विचार्य कार्यं कुरुथः । यूयं सर्वं समीक्ष्य वदथ । अहं छात्रान् अध्याप्य आगच्छामि । आवां कार्यं संपाद्य गृहं गच्छावः । वयं विचिन्त्य कार्यं कुर्मः । सा शिवं संपूज्य भवनं याति । पर्यटकाः हिमालयं विलोक्य प्रसन्नाः भवन्ति । भटाः शत्रून् विजित्य पारितोषिकं लभन्ते । कृषकाः धान्यं विक्रीय भवनम् यान्ति । लेखकः लेखान् विलिख्य धनम् अर्जयति । पत्रकारः वृतान्तं प्रकाश्य सत्यम् उद्घाटयति । त्वां प्राप्य मनः प्रसन्नम् अभवत् ।

१. वालकः किं कृत्वा सन्तुष्टः भवति ।
२. तौ किं कृत्वा आनन्दम् अनुभवतः ?
३. ते किं कृत्वा सुखम् इच्छन्ति ?
४. अहं किं कृत्वा तिष्ठामि ?
५. आवां किं कृत्वा कार्यं कुर्वः ?
६. वयं किं कृत्वा वदामः ?
७. त्वं किं कृत्वा आगच्छसि ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८. युवां किं कृत्वा गृहं गच्छथः ?
९. यूयं किं कृत्वा कार्यं कुरुथ ?
१०. सा किं कृत्वा भवनं याति ?
११. पर्यटकाः किं कृत्वा प्रसन्नाः भवन्ति ?
१२. भटाः किं कृत्वा पारितोषिकं लभन्ते ?
१३. कृषकाः किं कृत्वा भवनं यान्ति ?
१४. लेखकः किं कृत्वा धनम् अर्जयति ?
१५. पत्रकारः किं कृत्वा सत्यम् उद्घाटयति ?
१६. किं कृत्वा मनः प्रसन्नम् अभवत् ?

१०.१६. वाक्येषु प्रयोगं कुरुत ।

आलोच्य । उपसृत्य । समर्च्य । उपार्ज्य । प्राप्य । अधीत्य । समीक्ष्य । प्रणम्य । संकल्प्य । संक्षिप्य । विलिख्य । आघ्राय । आचम्य । विजित्य । विज्ञाय । उड्डीय । उपदिश्य । विधाय । निधाय । निपत्य । संपाद्य । उत्पाद्य । संपूज्य । आपृच्छ्य । संबोध्य । प्रबोध्य । विभज्य । विमुच्य । विरुध्य । आलोक्य । आश्रित्य ।

१०.१७. निम्नवाक्यानि पठत ।

केशवः कार्यं कर्तुं कार्यालयं याति । बालकौ क्रीडितुं प्राङ्गणं गच्छतः । बालिका फलं खादितुं वाञ्छति । त्वं गातुम् शक्नोषि । युवां पुष्पाणि घ्रातुम् इच्छथः । यूयं कुसुमानि चेतुं वाटिकां याथ । अहं काष्ठं छेत्तुं कुठारम् आनयामि । भटाः शत्रून् जेतुम् यतन्ते । रमा पत्रं टङ्कयितुं कार्यालयम् अधितिष्ठति । पर्यटकाः कौशिकीं तर्तुं तरणीम् आरोहन्ति । मुनयः स्वर्गं गन्तुम् तपः चरन्ति । त्वम् जीर्णवस्त्रं त्यक्तुम् इच्छसि । युवां पितॄन् तर्पयितुं जलाशयं गच्छथः । कृपणाः धनं दातुं न उत्सहन्ते । सिंहाः मृगान् विदारयितुम् धावन्ति । बालकाः नवं वस्त्रं धर्तुं यतन्ते । अश्वाः धावितुं प्रारभन्ते । ते इन्धनम् आनेतुं विपिनं यान्ति । महिषाः जलं पातुं निपानं प्रविशन्ति । राजानः जनान् पातुं सैनिकान् पालयन्ति । युवत्यः जलं पूरयितुं घटम् आनयन्ति । छात्राः पाठं पठितुं विद्यापीठं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गच्छन्ति । ते चलचित्रं विलोकयितुं दृश्ययन्त्रम् उद्घाटयन्ति । कः अपि मर्तुं न इच्छति । त्वं गृहं यातुम् ईप्ससि । युवां धनं लब्धुं यतेथे । यूयं कथां श्रोतुं गच्छथ । अहं त्वां बद्धुम् इच्छामि । शिष्याः गुरुन् प्रीणयितुं यतन्ते । वणिजः फलानि विक्रेतुम् आपणम् अभियान्ति । कवयः काव्यं रचयितुं लेखनीं गृह्णन्ति । चौराः धनं हर्तुं गृहं प्रविशन्ति । लुब्धकः मृगान् हन्तुं वनम् अभियाति ।

१०.१८. उपरितनवाक्यानि पठित्वा प्रश्नानामुत्तराणि लिखत ।

१. केशवः किं कर्तुं कार्यालयं गच्छति ?
२. बालकौ किमर्थं प्राङ्गणं गच्छतः ?
३. बालिका किं विधातुं वाञ्छति ?
४. अहं किं कर्तुं शक्नोमि ?
५. आवां किम् इच्छावः ?
६. वयं किं कर्तुं वाटिकां यामः ?
७. त्वं किमर्थं कुठारम् आनयसि ?
८. भटाः किं कर्तुं यतन्ते ?
९. रमा किमर्थं कार्यालयं अधितिष्ठति ?
१०. पर्यटकाः किं कर्तुं तरणीम् आरोहन्ति ?
११. मुनयः किमर्थं तपः कुर्वन्ति ?
१२. अहं किं कर्तुम् इच्छामि ?
१३. आवां किमर्थं जलाशयं गच्छावः ?
१४. कृपणाः किं विधातुं न उत्सहन्ते ?
१५. सिंहाः किमर्थं धावन्ति ?
१६. बालकाः किं कर्तुं यतन्ते ?
१७. अश्वाः किं कर्तुं प्रारभन्ते ?
१८. ते किमर्थं वनं यान्ति ?
१९. महिषाः किं कर्तुं निपानं प्रविशन्ति ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२०. राजानः किमर्थं सैनिकान् पालयन्ति ?
२१. छात्राः किमर्थं विद्यापीठं गच्छन्ति ?
२२. युवत्यः किं कर्तुं घटम् आनयन्ति ?
२३. ते किं कर्तुं दृश्ययन्त्रम् उद्घाटयन्ति ?
२४. कः अपि किं कर्तुं न इच्छति ?
२५. अहं किं कर्तुम् ईप्सामि ?
२६. आवां किं कर्तुं यतावहे ?
२७. वयं किमर्थं गच्छामः ?
२८. त्वं किं कर्तुम् इच्छसि ?
२९. शिष्याः किं कर्तुं यतन्ते ?
३०. वणिजः किं कर्तुम् आपणं यान्ति ?
३१. कवयः किमर्थम् लेखनीं गृह्णन्ति ?
३२. चौराः किमर्थं गृहं प्रविशन्ति ?
३३. लुब्धकः किं कर्तुं वनं याति ?

१०.१९. तुमुन्प्रत्ययान्तपदैः संयोजयत ।

१. रामः पाठं पठति । सः विद्यालयं गच्छति ।
२. बालकौ क्रीडतः । तौ प्राङ्गणं गच्छतः ।
३. बालिकाः विद्यालयं गच्छन्ति । ताः वस्त्राणि परिदधते ।
४. त्वम् आसनम् अधितिष्ठसि । त्वं पाठं पठसि ।
५. कृष्णः फलं चिनोति । सः उद्यानं गच्छति ।
६. युवां कार्यं कुरुथः । युवां कार्यालयं गच्छथः ।
७. यूयं जलं पिबथ । यूयं जलाशयं गच्छथ ।
८. अहं शिवं पूजयामि । अहं घण्टां वादयामि ।
९. वानरौ वृक्षम् आरोहतः । तौ फलं खादतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०. सूर्यः उदेति । सः जगत् प्रकाशयति ।

११. भिक्षुकाः भ्रमन्ति । ते आहारम् आनयन्ति ।

१२. जनाः उद्यानं गच्छन्ति । ते विहरन्ति ।

१३. बालकाः पुस्तकानि पठन्ति । ते ज्ञानं लभन्ते ।

१४. शृगालः कूपम् अभियाति । सः जलं पिबति ।

१५. उमेशः दृश्ययन्त्रम् उद्घाटयति । सः वृतान्तम् अवलोकयति ।

१६. सः पुष्पं जिघ्रति । सः वाटिकां गच्छति ।

१०.२०. निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

११	१२	१३	१४	१५
एकादश	द्वादश	त्रयोदश	चतुर्दश	पञ्चदश
१६	१७	१८	१९	२०
षोडश	सप्तदश	अष्टादश	नवदश	विंशतिः
२१	२२	२३	२४	२५
एकविंशतिः	द्वाविंशतिः	त्रयोविंशतिः	चतुर्विंशतिः	पञ्चविंशतिः
२६	२७	२८	२९	३०
षड्विंशतिः	सप्तविंशतिः	अष्टाविंशतिः	नवविंशतिः	त्रिंशत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादश पाठः

(कर्तृकरणयोस्तृतीया)

प्रथमपुरुषे	एकव.	रामः	करेण	धारयति ।
	द्विव.	रामौ	नेत्राभ्यां	पश्यतः ।
	बहुव.	रामाः	लगुडैः	ताडयन्ति ।
मध्यमपुरुषे	एकव.	त्वं	जलेन	क्षालयसि ।
	द्विव.	युवाम्	हस्ताभ्यां	खादथः ।
	बहुव.	यूयम्	लेखनीभिः	लिखथ ।
उत्तमपुरुषे	एकव.	अहं	पादाभ्यां	गच्छामि ।
	द्विव.	आवां	खनित्राभ्यां	खनावः ।
	बहुव.	वयं	पुष्पैः	पूजयामः ।

११.१ अधोलिखितवाक्यानि पठत ।

रामः कुठारेण वृक्षं छिनत्ति। सीता हस्तेन फलं खादति । हरिः लेखन्या पत्रं लिखति । नारी करेण रोटिकां गृह्णाति । गुरुः मुखेन छात्रं पाठयति । वधूः जलेन वर्तनं क्षालयति । बालकः दण्डेन सर्पं मारयति । त्वं पुष्पेण देवं पूजयसि । अहं द्विचक्रिकया विद्यालयं गच्छामि । माता करेण लेखनीं धारयति । पिता पणेन पुस्तकं क्रीणाति । गौरी खनित्रेण भूमिं खनति । नेता पत्रवाहकेन पत्रं प्रेषयति । राजा सैनिकेन युध्यते । मूर्खः व्यसनेन कालं यापयति । बालिका हस्तेन दिवसं गणयति । मालाकारः मालया शिवम् अर्चयति । सर्पः मुखेन भेकं गिरति । बालकः मनसा ईश्वरं स्मरति । नायकः मुखेन नायिकां चुम्बति । चौरः हस्तेन द्रविणं चोरयति । सेवकः छत्रेण स्वामिनं छादयति । शववाहकः वस्त्रेण शवम् आच्छादयति । त्वं मनसा मन्त्रं जपसि । अहम् अन्नेन जीवामि । दीपः तैलेन ज्वलति । चन्द्रः सूर्यतेजसा प्रकाशते । पूजकः सलिलेन पितरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्पयति । मशकः मुखेन रक्तं पिबति । सर्पः दशनेन मानवं दशति । वनेचरः अग्निना वनं दहति । खलः वचसा सज्जनं निन्दति । फलेन शरीरं पुष्यति । युवतिः जलेन घटं पूरयति । दाता अन्नेन दीनं भरति । वामा भूषणेन वदनं मण्डयति ।

११.२. निम्नप्रश्नानामुत्तराणि लिखत ।

१. वामाः केन वदनं मण्डयन्ति ? २. दाता केन दीनं भरति ? ३. रामः केन वृक्षं छिनत्ति ? ४. सीता केन फलं खादति ? ५. खलः केन सज्जनं निन्दति ? ६. नारी केन रोटिकां भक्षयति ? ७. बधूः केन वर्तनं क्षालयति ? ८. अहं केन देवं पूजयामि ? ९. बालकः केन सर्पं मारयति ? १०. त्वं केन विद्यालयं गच्छसि ? ११. चन्द्रः केन प्रकाशते ? १२. मशकः केन रक्तं पिबति ? १३. पूजकः केन पितरं तर्पयति ? १४. वनेचरः केन वनं दहति ? १५. माता केन लेखनीं धारयति ? १६. पिता केन पुस्तकं क्रीणाति ? १७. त्वं केन जीवसि ? १८. सेवकः केन स्वामिनं छादयति ? १९. चौरः केन द्रविणं चोरयति ? २०. बालकः केन ईश्वरं स्मरति ? २१. सर्पः केन भेकं निगिरति ? २२. मालाकारः केन शिवम् अर्चयति ? २३. मूर्खः केन कालं यापयति ? २४. नेता केन पत्रं प्रेषयति ? २५. गौरी केन भूमिं खनति ? २६. खलः केन सज्जनं निन्दति ? २७. युवतिः केन घटं पूरयति ?

११.३. उपरितन (११.१) वाक्यानां द्विवचने बहुवचने च परिवर्तनं कुरुत ।

११.४. कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानं पूरयत ।

१) सूर्यः .... जगत् प्रकाशते (तेजस्) ।
२) देवाः .... समुद्रम् अमथ्नन् (मन्दराचल) ।
३) बालिकाः ....मुखानि मण्डयन्ति (अलङ्कार) ।
४) पुष्पाणि .... अवर्धन्त (सलिल) ।
५) बालकाः .... मङ्गलग्रहं पश्यन्ति (दूरवीक्षण) ।
६) वयम् .... शिखरं विलोकयामः (चक्षुष्) ।
७) माता .... चणकान् भृज्जति (हस्त) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८) अश्वा: .... धावन्ति (पाद) ।

९) मित्राणि .... पत्राणि लिखन्ति (लेखनी) ।

१०) वाला: .... मधु लिहन्ति (जिह्वा) ।

११) रजक: ....भारं वहति (गर्दभ:) ।

१२) ज्योतिर्विद: .... ग्रहगतिं निर्णयन्ति (गणित) ।

१३) वयं .... ईश्वरं स्मराम: (मनस्) ।

१४) शुक्र: .... द्योतते (सूर्यतेजस्) ।

१५) वयं .... दीपं ज्वालयाम: (अग्नि) ।

१६) खलौ .... सज्जनान् निन्दत: (वचस्) ।

१७) बालिका: .... वदनानि मण्डयन्ति (भूषण) ।

१८) पूजकौ .... ईश्वरं पूजयत: (पुष्प) ।

१९) ते .... शिवं ध्यायन्ति (चेत:) ।

२०) सर्पा: .... मूषकान् गिरन्ति (मुख) ।

२१) सिंहा: .... मृगान् घातयन्ति (दन्त) ।

२२) व्याघ्रा: .... मांसं खादन्ति (वदन) ।

२३) अहम् .... पुष्पगन्धं जिघ्रामि (नासिका) ।

२४) ता: .... शब्दं शृण्वन्ति (कर्ण) ।

२५) रमा .... फलम् अखादत् (हस्त) ।

११.५. कोष्ठस्थपदान्यनुसृत्य प्रश्नानामुत्तराणि लिखत ।

(सार्वनामिकपदानां प्रयोगोऽपेक्षित:)

१) रमा केन कार्यं करोति ? (हस्त)

२) हरि: केन जलं पिबति ? (जलपात्र)

३) माता कया बालं ताडयति ? (मुष्टि)

४) युवका: कै: क्रीडन्ति ? (कन्दुक)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५) वानराः काभ्यां वृक्षम् आरोहन्ति (कर)

६) मशकः केन नरान् दशति ? (तुण्ड)

७) विटः काभ्यां चेटीं चुम्बति ? (ओष्ठ)

८) वयं केन नगरं गच्छामः ? (मोटरयान)

९) त्वं केन कार्यं करोषि ? (हस्त)

१०) स्तेनः केन द्रव्यं हरति ? (कर)

११) व्याघ्राः कैः मृगान् विदारयन्ति (दन्त)

१२) अहं काभ्याम् हिमालयं विलोकयामि ? (नयन)

१३) आवां कया आम्रफलानि स्वदामहे ? (रसना)

१४) वयं केन अपूपं भक्षयामः (मुख)

१५) बालिकाः कैः पुष्पाणि चिन्वन्ति ? (कर)

१६) करिणः काभिः वृक्षान् त्रोटयन्ति ? (शुण्डा)

१७) यूयं केन ईश्वरं पूजयथ (कुसुम)

१८) वृकाः कै : महिषान् घातयन्ति ? (नख)

१९) त्वम् कया ग्रामं गच्छसि (द्विचक्रिका)

२०) वयं केन क्षेत्रं कर्षामः (कुद्दालक)

११.६. अधोलिखितवाक्यानि पठत ।

केशवः प्रकृत्या दुर्जनः अस्ति । त्वं स्वभावेन सज्जनः असि । अहं जात्या ब्राह्मणः अस्मि । अयं नाम्ना केशवः अस्ति । लक्ष्मणः रामेण सह अगच्छत् । त्वं तेन सह गृहं यासि । मया सार्धं केशवः याति । रामेण साकं द्वेषः नास्ति । धर्मेण सदृशः अन्यः बन्धुः नास्ति । त्वया सदृशं मित्रं न विद्यते । केन हेतुना त्वं गृहं गच्छसि ? श्रमेण विना छात्राः विद्यां न लभन्ते । विद्यया हीनाः जनाः पशुभिः समानाः भवन्ति । श्रमेण अलम् । धनेन किं प्रयोजनम् ? अयं जटाभिः किं तापसः अस्ति ? अहं पञ्चवर्षैः गणितम् अपठम् । बालकः चक्षुषा काणः अस्ति । बालिका कर्णाभ्यां वधिरा विद्यते । त्वं पादेन खञ्जः असि । ते पृष्ठैः कुब्जाः सन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

११.७. वाक्येषु प्रयोगं कुरुत । CC-0. In Public Domain. Digitization by eGangotri

जलेन । सह । साकम् । तुल्यम् । सदृशः । प्रकृत्या । जात्या । स्वाभावेन । कैः । विहीनाः । विना । अलम् । धनेन । पुस्तकेन । दशवर्षैः । काणः । खञ्जः ।

११.८ कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानानि पूरयत ।

१) केशवौ .... दुर्जनौ स्तः (प्रकृति)
२) युवां .... सज्जनौ स्थः (स्वभाव) ।
३) यूयं .... ब्राह्मणाः स्थ (कर्म) ।
४) सः .... रामः अस्ति (नाम) ।
५) केशवः .... सह गृहं गच्छति (स्त्री) ।
६) सा .... साकं न तिष्ठति (अस्मद्) ।
७) वयम् .... सार्धं गच्छामः(तत्-स्त्री.ब.) ।
८) .... सदृशी माता नास्ति (तत्-स्त्री.ए.)
९) केन .... त्वं रुदसि (हेतु) ?
१०) .... विना वयं न जीवामः (अन्न) ।
११) .... हीनः नरः पशुः अस्ति (विद्या) ।
१२) .... अलम् (धन) ।
१३) .... प्रयोजनं नास्ति । (द्रव्य) ।
१४) .... पयः मधुरं भवति । (प्रकृति) ।
१५) ते .... अर्थशास्त्रम् अपठन् (दश, दिन) ।
१६) अयं बालः .... काणः अभवत् (चक्षु) ।
१७) आवां .... बधिरौ स्वः (कर्ण) ।
१८) अहं .... कुब्जः अस्मि (पृष्ठ) ।
१९) बालिका .... खञ्जा अस्ति (चरण) ।
२०) ते .... छात्राः सन्ति (पुस्तक) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशपाठः

(अनुक्ते कर्तरि तृतीया)

प्रथमपुरुषे	एकव.	(तेन)	पाठः	पठ्यते ।
	द्विव.	(ताभ्याम्)	पाठौ	पठ्येते ।
	बहुव.	(तैः)	पाठाः	पठ्यन्ते ।
मध्यमपुरुषे	एकव.	(तेन)	त्वं	मुच्यसे ।
	द्विव.	(ताभ्यां)	युवां	मुच्येथे ।
	बहुव.	(तैः)	यूयं	मुच्यध्वे ।
उत्तमपुरुषे	एकव.	(तेन)	अहं	मुच्ये
	द्विव.	(ताभ्याम्)	आवां	मुच्यावहे ।
	बहुव.	(तैः)	वयं	मुच्यामहे ।

१२.१ अधोलिखितवाक्यानि पठत ।

कर्तृवाच्ये	कर्मवाच्ये
१) रामः पाठं पाठयति ।	१) रामेण पाठः पाठ्यते ।
२) रामः पाठौ पाठयति ।	२) रामेण पाठौ पाठ्येते ।
३) रामः पाठान् पाठयति	३) रामेण पाठाः पाठ्यन्ते ।
४) केशवः त्वाम् पाठयति ।	४) केशवेन त्वं पाठ्यसे ।
५) सः युवां पाठयति ।	५) तेन युवां पाठ्येथे ।
६) तौ युस्मान् पाठयतः ।	६) ताभ्यां यूयं पाठ्यध्वे ।
७) तौ मां पाठयन्ति ।	७) तैः अहं पाठ्ये ।
८) त्वं आवां पाठयसि ।	८) त्वया आवां पाठ्यावहे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९) युवां अस्मान् पाठयथः ।	९) युस्माभिः वयं पाठ्यामहे ।
१०) यूयं तम् अपाठयत् ।	१०) युष्मामिः सः अपाठ्यत ।
११) अहं तौ अपाठयम् ।	११) मया तौ अपाठ्येताम् ।
१२) आवां तान् अपाठयामः ।	१२) आवाभ्यां ते अपाठ्यन्त ।
१३) वयं त्वाम् अपाठयामः ।	१३) अस्माभिः त्वम् अपाठ्यथाः ।
१४) सा युवाम् अपाठयत् ।	१४) तया युवाम् अपाठ्येथाम् ।
१५) ते युष्मान् अपाठयन् ।	१५) ताभ्याम् यूयम् अपाठ्यध्वम् ।
१६) ताः माम् अपाठयन् ।	१६) ताभिः अहम् अपाठ्ये ।
१७) त्वं आवाम् अपाठयः ।	१७) त्वया आवाम् अपाठ्यावहि ।
१८) युवाम् अस्मान् अपाठयतम् ।	१८) युवाभ्याम् वयम् अपाठ्यामहि ।
१९) यूयम् तम् पाठयिष्यथ ।	१९) युष्माभिः सः पाठयिष्यते ।
२०) अहं तौ पाठयिष्यामि	२०) मया तौ पाठयिष्येते ।
२१) आवाम् तान् पाठयिष्यावः ।	२१) आवाभ्यां ते पाठयिष्यन्ते ।
२२) वयं त्वाम् पाठयिष्यामः ।	२२) अस्माभिः त्वं पाठयिष्यसे ।
२३) सा युवाम् पाठयिष्यति ।	२३) अस्माभिः युवाम् पाठयिष्येथे ।
२४) ते युष्मान् पाठयिष्यन्ति ।	२४) ताभ्याम् यूयम् पाठयिष्यध्वे ।
२५) ताः माम् पाठयिष्यन्ति ।	२५) ताभिः अहं पाठयिष्ये ।
२६) त्वं आवाम् पाठयिष्यसि ।	२६) त्वया आवाम् पाठयिष्यावहे ।
२७) युवाम् अस्मान् पाठयिष्यथः ।	२७) युवाभ्याम् वयं पाठयिष्यामहे ।
२८) यूयं तं पाठितवन्तः ।	२८) युस्माभिः सः पाठितः ।
२९) अहं तौ पाठितवान् ।	२९) मया तौ पाठितौ ।
३०) आवां तान् पाठितवन्तौ ।	३०) आवाभ्याम् ते पाठिताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२.२ कर्मवाच्ये परिवर्तनं कुरुत ।

रामः फलं काङ्क्षति । ते शत्रून् जयन्ति । अहं त्वाम् त्यजामि । आवां युवाम् पश्यावः । वयं युष्मान् नमामः । त्वं मां नयसि । युवाम् आवां पाठयावः । यूयं अस्मान् नर्तयथ । स जलम् अपिबत् । तौ फले अखादताम् । ते ईश्वरम् अभजन् । स त्वाम् अभरत् । ते देवान् अयजन् । रामः युवाम् अरक्षत् । दरिद्रः धनम् अयाचत । ते पुस्तकानि अलभन्त । ते युष्मान् अश्रयन् । त्वं माम् असेवेथाः । युवाम् आवाम् अस्मरतम् । यूयम् अस्मान् अक्षमध्वम् । सः क्षेत्रं खनिष्यति । तौ फले भक्षयिष्यतः । ते काष्ठानि धक्ष्यन्ति । अहं त्वाम् वन्दिष्ये । वयं युवाम् शङ्किष्यामहे । आवां युष्मान् वेदिष्यावः । त्वम् माम् स्नापयष्यिसि । युवाम् आवाम् स्वापयिष्यथः । यूयम् अस्मान् हनिष्यथ । रामः रावणं हतवान् । त्वं वृक्षौ पातितवान् । युवाम् शत्रून् घातितवन्तः । शशकः सिंहं विनाशितवान् । आवां कार्याणि कृतवन्तौ । वयं फले खादितवन्तः । ते बालान् पाठितवन्तः । तौ तां पूजितवन्तौ । रामः गां पयः दोग्धि । वामनः वलिं वसुधां भिक्षते । बालिका माणबकं पन्थानं ब्रूते । दरिद्रः राजानं धनं याचते । गोपालः गां व्रजमवरुणद्धि । देवाः समुद्रं सुधाम् अमथ्नन् । स अजां ग्रामं नयति । चौरः कृपणं धनम् अहरत् । नराः वसुधां रत्नानि कर्षन्ति ।

१२.३ कर्तृवाच्ये परिवर्तनं कुरुत ।

मया पाठाः पठ्यन्ते । आवाभ्यां फले काङ्क्ष्येते । अस्माभिः त्वं नीयसे । युवाभ्याम् कार्याणि क्रियन्ते । वानेरेण शाखाः त्रोट्यन्ते । त्वया अहं पीड्ये । मया त्वं तर्ज्यसे । बालिकाभिः दुग्धं पीयते । युष्माभिः चणकाः चर्व्यन्ते । तैः पुष्पाणि चीयन्ते । विटैः नार्यः चुम्ब्यन्ते । सर्पैः भेकाः गीर्यन्ते । अस्माभिः वृक्षाः रक्ष्यन्ते । आवाभ्यां विद्या प्राप्यते । मया त्वं ताड्यसे । ज्ञानेन संशयाः छिद्यन्ते । मूढैः सज्जनाः तुद्यन्ते । सद्भिः कुलटाः त्यज्यन्ते । सैनिकेन शत्रू दण्डयेते । नृपैः धनं वितीर्यते । व्याघ्रेण त्वं दीर्यसे । तया युवां निन्द्येथे । मया जलम् अपीयत । युवाभ्याम् अहं पाल्ये । ज्वरेण वयं पीड्यामहे । मलेन वृक्षाः अपुष्यन्त । अस्माभिः देवाः अपूज्यन्त । बालिकया घटौ अपूर्येताम् । अलङ्कारैः काव्यानि अभूष्यन्त ।

Acc. 22608
22404

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावकैः नाटकानि मीमांस्यन्ते । सिंहैः मृगाः मार्ग्यन्ते । अस्माभिः त्वम् अमुच्यथाः । तया धनं याच्यते । तैः वयं अरक्ष्यावहि । कविभिः काव्यं रच्यते । तेन पुस्तकानि पाठितानि । तया मोदकं खादितम् । मया नाटकम् रचितम् । शशकेन सिंहः घातितः । रामेण गौः पयः दुह्यते । तेन वृषभः ग्रामं नीयते । देवैः समुद्रः सुधां मथ्यते । मया तण्डुलाः ओदनं पच्यन्ते ।

१२.४ भाववाच्ये परिवर्तनं कुरुत ।

रामः हसति । बालिके रुदतः । मातरः उत्तिष्ठन्ति । मधुकराः भ्रमन्ति । मृगाः बिभ्यति । मूर्खाः कुप्यन्ति । वयं जृम्भामहे । त्वं भवसि । आवां एधावहे । वृक्षाः कम्पन्ते । बालाः बुभुक्षया क्रन्दन्ति । जम्बुका क्रोशन्ति । बालिके हसतः । वयं क्षुध्यामः । तौ ग्लायतः । दुन्दुभयः घोषन्ति । तारकाः चकासति । जलं च्योतति । यूयं जीवथ । अग्निः ज्वलति । यूयं सेवया तुष्यथ । पूजया देवाः तृप्यन्ति । वामाः अत्रपन्त । बालकाः अत्रस्यन् । त्वम् अत्वरथाः । नक्षत्राणि अदीप्यन्त । सूर्यातपेन ग्रहाः अद्योतन्त । घटिका नदति । शस्त्रप्रयोगेण मानवाः नश्यन्ति । मयूराः घनगर्जनेन नृत्यन्ति । वयं पतिष्यामः । अङ्कुराः उत्पत्स्यन्ते । हंसौ धाविष्यतः । वयं मुह्यामः । यूयं यतिष्यध्वे । ते रुदितवन्तः । वयं हसितवन्तः । युवाम् उल्लसितवन्तौ । बालिकाः कुपितवत्यः ।

१२.५ अधोलिखितवाक्यानि पठत ।

कार्यं क्रियताम् । पत्राणि लिख्यन्ताम् । काव्ये रच्येताम् । देवाः पूज्यन्ताम् । घटेषु जलानि पूर्यन्ताम् । नावः आनीयन्ताम् । नाटकानि रच्यन्ताम् । मोदकं खाद्यताम् । बालकाः पाल्यन्ताम् । पाठाः पठ्यन्ताम् । गावः दुह्यन्ताम् । धनानि याच्यन्ताम् । वृकाः निवार्यन्ताम् । जनाः रक्ष्यन्ताम् । देवाः तृप्यन्ताम् । भूमयः लिप्यन्ताम् । रसाः लिह्यन्ताम् । वानराः दृश्यन्ताम् । क्षेत्राणि कृष्यन्ताम् । वार्ताः श्रूयन्ताम् । विद्वासः श्लाघ्यन्ताम् । वस्त्रं सीव्यताम् । छात्रौ सूच्येताम् । शिवः स्तूयताम् । मातरः सेव्यन्ताम् । अध्ययनं न त्यज्यताम् । चणकाः चर्व्यन्ताम् । घटिका नद्यताम् । मूढाः निन्द्यन्ताम् । काव्यानि मीमांस्यन्ताम् । नाटकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चर्च्यताम्। विषयः विमृश्यताम्। चौराः ताड्यन्ताम्। पुष्पाणि चीयन्ताम्।

१२.६ उपरितन (१२.५) वाक्यानां कर्तृवाच्ये परिवर्तनं कुरुत।

१२.७ कोष्ठस्थपदान्यनुसृत्य निम्नप्रश्नानामुत्तराणि लिखत।

(सार्वनामिकपदानां प्रयोग आवश्यकः)

१)	बालिकया किं क्रियते ?	(पाठ, पठ)
२)	बालैः कानि वस्तूनि खाद्यन्ते ?	(आम्रफल)
३)	रमाभिः किं विधीयते ?	(वस्त्र, सीव्)
४)	वानरैः किं क्रियते ?	(फल, पात)
५)	कैः क्रन्द्यते ?	(बालिका)
६)	रमेशाभ्यां किं त्यज्यते ?	(कार्य)
७)	भ्रात्रा किं क्रियते ?	(पुस्तक, वि-क्री)
८)	शरीरं केन पुष्यते ?	(जल)
९)	मातृभिः के पाल्यन्ते ?	(अस्मद्-बहु.)
१०)	गुरुभिः किं पाठ्यते ?	(पाठ-ब.)
११)	त्वया किं विधीयते ?	(कन्दुक, क्रीड्)
१२)	चौरैः किं नीयते ?	(धन)
१३)	लुण्ठकैः त्वं किं क्रियसे ?	(ताड्)
१४)	मशकैः के अदश्यन्त	(युष्मद्)
१५)	कैः चणकाः खादिष्यन्ते	(अस्मद्)
१६)	त्वया किं खादितम् ?	(रोटिका)
१७)	सीतया किं पीतम् ?	(जल)
१८)	अस्माभिः किं लिखितम् ?	(काव्य)
१९)	अनुजाभ्यां किं पठितम् ?	(कथा)
२०)	मित्रैः किं प्रेषितम् ?	(पत्र)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२.८ अशुद्धीः संशोधयत ।

अहं पाठः पठ्यते । तया छात्रान् पाठ्यन्ते । केन कार्याणि क्रियते । चौराः धनं हृयन्ते । मूषकाः अन्नानि खाद्यते । युष्माभिः बालकान् पाठ्यते । ताभिः चणकाः भृज्यन्ते । अहं लेखः अलिख्यत । फलानि खाद्यताम् । देवाः तर्प्यताम् । मूढाः अपसार्यताम् । पदार्थाः विक्रीयताम् । त्वया हस्यन्ताम् । सीतया जलं पिबति । ताभिः कार्यं समाप्नोति । सर्पैः भेकाः निगिरन्ति । मूर्खः सज्जनान् तुदन्ति । त्वया किं कृतवान् । मया लेखान् लिखितम् । बालकैः रुदितवन्तः ।

१२.९ वाक्येषु प्रयोगं कुरुत ।

याच्यते । क्रियन्ते । निर्मीयन्ते । पाठ्यन्ते । खाद्येते । निगद्यते । प्रकाश्यते । स्तूयन्ते । जृम्भ्यते । गम्यते । ईड्यन्ते । काम्यते । कूज्यते । कृन्त्यन्ते । कृष्येते । क्रियन्ते । क्रीड्येते । लिख्यन्ते । क्षिप्यताम् । खन्यताम् । गण्यताम् । निगृह्यताम् । चर्व्यताम् । छिद्यताम् । जीव्यते । बध्यसे । तर्ज्येथे । दह्यते । दुष्यते । दृश्यन्ते । दीर्यते । दीयते । धार्यते । ध्वन्यते । प्रणम्यते । नश्यन्ते । निन्द्यते । नूयते । पच्येते । पीयते । पाल्यन्ते । पुष्यते । पूयते । पूज्यसे । भर्त्स्येथे । भूष्यते । मथ्यते । मृग्यसे । प्रारभ्यन्ते । लभ्यते । अवलोक्यते । ऊह्यते । शक्यते । निषिध्यते । सेव्यन्ते ।

१२. १० कर्मवाच्यस्य प्रयोगं विधाय विंशतिवाक्यानि लिखत ।

१२.११ परस्परं मेलयत ।

रामः	पीयताम्
तौ	क्रीडति
त्वं	पठथः
यूयं	अखादम्
अहं	हसथ ।
अस्माभिः	नृत्यसि
जलं	खादितानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२.१२. प्रश्नार्थकवाक्येषु परिवर्तनं कुरुत ।

(द्र. १२.२, १२.३, १२.४)

१२.१३. निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

३१	३२	३३	३४	३५
एकत्रिंशत्	द्वात्रिंशत्	त्रयस्त्रिंशत्	चतुस्त्रिंशत्	पञ्चत्रिंशत्
३६	३७	३८	३९	४०
षट्त्रिंशत्	सप्तत्रिंशत्	अष्टत्रिंशत्	नवत्रिंशत्	चत्वारिंशत्
४१	४२	४३	४४	४५
एकचत्वारिंशत्	द्विचत्वारिंशत्	त्रिचत्वारिंशत्	चतुश्चत्वारिंशत्	पञ्चत्वारिंशत्
४६	४७	४८	४९	५०
षट्चत्वारिंशत्	सप्तचत्वारिंशत्	अष्टचत्वरिंशत्	नवचत्वारिंशत्	पञ्चाशत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशपाठः

(संप्रदाने चतुर्थी)

प्रथमपुरुषे-	एकव.	सः	मह्यं धनं ददाति ।
	द्विव.	तौ	आवाभ्यां पुस्तके दत्तः ।
	बहुव.	ते	अस्मभ्यं फलानि ददति ।
मध्यमपुरुषे-	एकव.	त्वं	तस्मै अन्नं ददासि ।
	द्विव.	युवाम्	ताभ्याम् फले दत्थः ।
	बहुव.	यूयं	तेभ्यः धनानि दत्थ ।
उत्तमपुरुषे-	एकव.	अहं	तुभ्यं फलं ददामि ।
	द्विव.	आवां	युवाभ्याम् छत्रे दद्वः ।
	बहुव.	वयं	युष्मभ्यम् उपानहौ दद्मः ।

१३.१ अधोलिखितवाक्यानि पठत ।

सः पत्ये शेते । तौ पुत्राय गच्छतः । भक्तः मुक्तये हरिं भजति । बालः दुग्धाय क्रन्दति । त्वं धनाय प्रयतसे । धनं सुखाय भवति । विद्या ज्ञानाय वर्तते । केशवः आभूषणाय सुवर्णम् आनयति । तुभ्यं हितं वा सुखं भवतु । शिशवे क्रीडनकं रोचते । गीतायै रामायणं रोचते । सः मह्यं शतं धारयति । युवती बालाय स्पृह्यति । अहं धनवन्तं तृणाय मन्ये । पिता पुत्राय क्रुध्यति । गोविन्दः मह्यम् ईर्ष्यति । खलः सज्जनाय असूयति । सीता रावणाय अकुप्यत् । श्यामौ दानाय धनम् अर्जयतः । नागरिकाः देशोत्थानाय यतन्ते । सेवकाः फलेभ्यः यान्ति । दिलीपः वनाय गाम् अमुञ्चत् । ईश्वराय नमः अस्ति । तुभ्यं स्वस्ति भवतु । दानवेभ्यः दुर्गा अलम् । दैत्येभ्यः विष्णुः समर्थः अस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३.२. निम्नप्रश्नानामुत्तराणि लिखत।

१. सः कस्मै शेते ? २. भक्तः कस्मै हरिं भजति ? ३. बालः कस्मै क्रन्दति ? ४. अहं कस्मै प्रयते ? ५. धनं कस्मै भवति ? ६. विद्या कस्मै वर्तते ? ७. केशवः किमर्थं सुवर्णमानयति ? ८. कस्मै क्रीडनकं रोचते ? ९. रामायणं कस्यै रोचते ? १०. सः कस्मै शतं धारयति ? ११. युवतिः कस्मै स्पृहयति ? १२. त्वं कं तृणाय मन्यसे ? १३. पिता कस्मै क्रुध्यति ? १४. खलः कस्मै असूयति ? १५. श्यामौ कस्मै धनं अर्जयतः ? १६. नागरिकाः किमर्थं यतन्ते ? १७. सेवकाः केभ्यः यान्ति ? १८. कस्मै नमः अस्ति ? १९. दुर्गा कस्मै अलम् ? २०. विष्णुः केभ्यः समर्थः अस्ति ?

१३.३. कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानानि पूरयत।

१) अहं .... न स्पृहयामि। (धन)
२) सज्जनः .... चेष्टते। (परोपकार)
३) मोदकं .... रोचते। (बालक)
४) मूर्खः .... ईर्ष्यति। (युष्मद्)
५) सः दुर्जनः .... द्रुह्यति। (तत्, सज्जन)
६) पिता .... क्रुध्यति। (पुत्र)
७) कृष्णः .... शतं धारयति। (अस्मद्)
८) मुनिः .... ईश्वरं भजते।
९) नृपः .... धनम् अदात्। (ब्राह्मण)
१०) शिक्षाध्यक्षः .... पारितोषिकम् अयच्छत्। (छात्र)
११) त्वम् .... कस्मै ईर्ष्यसि (युष्मद्)
१२) इदम् .... देहि। (रुग्ण)
१३) भवान् .... नमस्करोतु। (तत्, प्राक्तन, मुनि)
१४) .... स्वस्ति भवतु। (ब्राह्मण)
१५) त्वम्....................... तरलं कृशरं देहि। (तद्, रुग्ण)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१६) मल्लः .... प्रभवति । (मल्ल)

१७) ज्ञानं .... कल्पते । (सुख)

१८) बालिका .... यान्ति । (पुष्प)

१९) कवयः..................... काव्यं सृजन्ति । (यश)

२०) छात्राः .... पठन्ति । (धन)

१३.४. **वाक्येषु प्रयोगं कुरुत ।**

खट्वायै । कुण्डलेभ्यः । भोजनाय । नमः । स्वस्ति । स्वाहा । स्वधा । अलम् । गवे । प्रजायै । वासाय । धनाय । यज्ञाय । युष्मभ्यम् । आनन्दाय । स्पृहयंति । ददाति । अर्पयति । क्रुध्यति । ईर्ष्यति असूयति । श्लाघते । प्रवसति । धनाय । अकुप्यत् । दीयताम् । विद्यायै । स्पृहयन्ति । वितरन्ति ।

१३.५. **अशुद्धीः संशोधयत ।**

अहं त्वां न द्रुह्याामि । हरिं नमः । विष्णोः स्वस्ति । भिक्षुं भिक्षां देहि । याचकः धनं राजानं याचते । कृष्णः कंसम् अकुप्यत् । अहं त्वां स्पृहयामि । सः मां सहस्रं धारयति । मां मोदकं रोचते । भृत्याः स्वामिनं श्लाघन्ते । रामः पठनं विद्यालयं गच्छति । मां पुस्तकं दीयताम् । सः तं पुस्तकम् अर्पयति । ते दीनान् द्रव्यं ददति । दुर्योधनः पाण्डवान् अद्रुह्यत् । अस्मान् धनानि दीयन्ताम् । माम् अपूपः स्वदते । दैत्यस्य हरिः अलम् । तं द्रव्यं देहि । वनं गाम् अमुञ्चत् । सेवकाः फलं यान्ति ।

१३.६. **निम्नप्रश्ननानामुत्तराणि कोष्ठानुसारं लिखत ।**

(सार्वनामिकपदप्रयोगोऽत्रापेक्षितः)

१) रामः कस्मै श्लाघते ? (युष्मद्)

२) श्यामौ कस्मै यतेते ? (धन)

३) रामाः किमर्थं गच्छन्ति ? (फल)

४) विधवा कस्मै असूयति ? (सती)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५) छात्राः किमर्थं गच्छन्ति ? (पठन)

६) रमा कस्मै प्रयोजनाय याति ? (स्नान)

७) त्वम् कस्मै ईर्ष्यसि ? (युष्मद्)

८) उपदेशः कस्मै भवति ? (प्रकोप)

९) युवां किमर्थं पठथः ? (यशस्)

१०) यूयं कस्मै गच्छथ ? (क्रीडनक)

११) वयं कस्मै पुस्तकं समर्पयामः । (तत्, बुध)

१२) फलं कस्मै न रोचते ? (अस्मद्)

१३) सीता कस्मै अकुप्यत् ? (अस्मद्)

१४) सः किमर्थं धनम् अर्जयति । (सुख)

१५) भरतः कस्मै आराधयति । (विष्णु)

१६) रामायणपठनं कस्य रोचते ? (गीता)

१७) रामौ तान् कस्मै मन्यन्ते ? (तृण)

१८) वाताः किमर्थं वान्ति ? (परोपकार)

१९) बालिके कस्मै वनं गच्छतः ? (इन्धन)

२०) मूढाः केभ्यः ईर्ष्यन्ति ? (सज्जन)

१३.६. निम्नलिखितं गद्यभागं पठित्वा तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

श्रीनगरे ब्रह्मपुरं नाम नगरम् आसीत् । तत्र घण्टाकर्णः इति नाम राक्षसः प्रतिवसति इति जनाः कथयन्ति स्म । एकदा घण्टाम् आदाय पलायमानः चौरः व्याघ्रेण व्यापादितः खादितश्च । ततः तत्पाणिपतिता घण्टा वानरैः प्राप्ता । ते च वानराः तां घण्टाम् अनुक्षणं वादयन्ति स्म । ततः नगरजनैः सः मनुष्यः खादितः दृष्टः, प्रतिक्षणं घण्टारवः च अश्रूयत । अनन्तरं कुपितः घण्टाकर्ण : मुनष्यान् खादति घण्टाम् च वादयति इति निश्चित्य सर्वे जनाः नगरात् पलायिताः । ततः कया अपि वृद्धया विचारितम् - न अयम् अवसरः घण्टावादनस्य । मर्कटाः एव घण्टां वादयन्ति इति आलोच्य राजा निवेदितः - राजन्, यदि कियद् धनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मह्यं दीयते तदा घण्टाकर्णं साधयामि । ततः राज्ञा तस्यै धनं दत्तम् । तया च विपिनं गत्वा वानरप्रियाणि फलानि आनीय आकीर्णानि । वानराः च घण्टां परित्यज्य फलानि खादितुं प्रारभन्त । सा च तां घण्टाम् आदाय नगरम् आगच्छत्, पूज्या च अभवत् ।

१. श्रीनगरे किं नाम नगरम् आसीत् ?

२. जनाः किं कथयन्ति स्म ?

३. कीदृशः चौरः व्याघ्रेण खादितः ?

४. वानरैः का घण्टा समासादिता ?

५. नगरजनैः किं दृष्टम्, किञ्च श्रुतम् ?

६. जनाः किमर्थं नगरात्पलायिताः

७. वृद्धया किं निश्चितम् ?

८. वृद्धायै राज्ञा किं दत्तम् ?

९. सा कथं घण्टाम् अलभत ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दशपाठः

(अपादाने पञ्चमी)

प्रथमपुरुष	एकव.	सः	वृक्षात्	पतति ।
	द्विव.	तौ	वृक्षाभ्यां	पततः ।
	बहुव.	ते	वृक्षेभ्यः	पतन्ति ।
मध्यमपुरुषे	एकव.	त्वं	वृक्षात्	पतसि ।
	द्विव.	युवां	वृक्षात्	पतथः ।
	बहुव.	यूयं	वृक्षात्	पतथ ।
उत्तमपुरुषे	एकव.	अहं	वृक्षात्	पतामि ।
	द्विव.	आवां	वृक्षाभ्यां	पतावः ।
	बहुव.	वयं	वृक्षेभ्यः	पतामः ।

१४.१ अधोलिखितवाक्यानि पठत ।

पत्राणि वृक्षात् पतन्ति । केशवः अश्वात् अपतत् । मृगाः व्याघ्रेभ्यः बिभ्यति । वयं सिंहेभ्यः त्रस्यामः । सैनिक, मां शत्रोः त्रायस्व । केशवः त्वां भल्लुकाद् रक्षति । ते नरकाद् बिभ्यति । छात्राः अध्ययनाद् न विरमन्ति । पुण्यात्मानः धर्माद् न प्रमाद्यन्ति । नवोढाः युवकेभ्यः लज्जन्ते । केशवः पापात् पराजयते । विद्या नरं पापाद् निवारयति । पिता पुत्रं व्यसनाद् निषेधति । कामात् क्रोधः समुत्पद्यते । बीजेभ्यः अङ्कुराः समुत्पद्यन्ते । केशवः उपाध्यायाद् अधीते । छात्राः गुरोः पठन्ति । हिमालयाद् नद्यः प्रभवन्ति । शिष्यः गुरोः अन्तर्धत्ते । रामाद् अन्यः (भिन्नः/इतरः) मम प्रियः नास्ति । कृष्णाद् ऋते तव सखा नास्ति । केशवः रामाद् पूर्वदिशे वर्तते । माघात् उत्तरः फाल्गुनः अस्ति । भोजनात् पूर्वं हस्तौ पादौ च प्रक्षालय । उत्थानात् परतः शौचं कुरु । ग्रामात् प्राक्/प्रत्यक्/ दक्षिणा विपिनं वर्तते । नगराद् वहिः गच्छ । चैत्राद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरभ्य कार्यं कुरु । मार्गात् पञ्चमासाः सन्ति । आमरणाद् हरिं पूजय । वयम् आमूलाद् कथां शृणुमः । धनाद् विद्या गरीयसी भवति । श्यामात् पृथक् कार्यं न भवति । श्रमाद् विना धनं न प्राप्यते । बालाः प्रासादात् प्रेक्षन्ते । वधूः श्वसुराद् जिह्रेति । देवाः स्वर्गाद् निरीक्षन्ते । केशवः कृच्छ्रात् कार्यं करोति । शिशुः दुःखाद् रोदिति । भक्तिमार्गाद् ज्ञानमार्गः श्रेष्ठः भवति ।

१४.२ उपरितनवाक्यान्याश्रित्य प्रश्नानामुत्तराणि लिखत ।

(कर्तरि सार्वनामिकपदप्रयोगः कार्यः)

१) पत्राणि कस्मात् पतन्ति ?

२) केशवः कस्मात् अपतत् ?

३) मृगाः केभ्यः बिभ्यति ?

४) केशवः त्वां कस्माद् रक्षति ?

५) सैनिकः त्वां कस्माद् त्रायते ?

६) वयं कस्माद् बिभीमः ?

७) छात्राः कस्माद् न विरमन्ति ?

८) बालाः केभ्यः लज्जन्ते ?

९) विद्या नरं कस्माद् निवारयति ?

१०) पिता पुत्रं कस्माद् निषेधति ?

११) कस्मात् क्रोधः समुत्पद्यते ?

१२) अङ्कुराः केभ्यः प्रादुर्भवन्ति ?

१३) सरितः कस्मात् प्रभवन्ति ?

१४) कस्मात् अन्यः तव प्रियः नास्ति ?

१५) भोजनात् पूर्वं किं करोषि ?

१६) विद्या कस्माद् गरीयसी अस्ति ?

१७) आमूलात् किं शृणोषि ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८) कस्माद् विना धनं न भवति ?

१९) मार्गात् पञ्चमासा: के सन्ति ?

२०) वाला: कस्मात् पश्यन्ति ?

२१) शिशु: कस्माद् रोदिति ?

२२) केशव: कथं कार्यं करोति ?

२३) वधू: कस्माद् जिह्रेति ?

२५) ज्ञानमार्ग: कस्माद् श्रेष्ठ: अस्ति ?

२६) देवा: कुत: प्रेक्षन्ते ?

२७) कस्मात् पृथक् कार्यं न भवति ?

२८) कुत: कार्यं प्रारभ्यते ?

२९) केशव: कस्मात् पूर्वदेशे वर्तते ?

३०) शिष्य: कस्मात् अन्तर्धन्ते ?

३१) कुत: प्राक् विपिनं विद्यते ?

१४.३ प्रकोष्ठान्यनुसृत्य रिक्तस्थानानि पूरयत ।

१ वानरा: .... अवरोहन्ति (पर्वत) ।
२ फले .... अपतताम् (वृक्ष) ।
३ गाव: .... बिभ्यति (सिंह) ।
४ आवां .... त्रस्याव: (भल्लूक) ।
५ सैनिका: देशान् .... त्रायन्ते (वैरिन्) ।
६ राम: .... अवतरति (शिखर) ।
७ वयं .... बिभीम: (नरक) ।
८ शिक्षका: .... न विरमन्ति (शिक्षण) ।
९ वैशाख: .... उत्तर: वर्तते । (चैत्र) ।
१० त्वम् .... आरभ्य कार्यं करोषि । (पौष) ।
११ रामौ .... परत: शौचं कुरुत: (शयन) ।
१२ ग्राम: .... प्राक् अस्ति । (अरण्य) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३ जन्मभूमिः .... गरीयसी विद्यते । (स्वर्ग) ।
१४ नवोढा .... जिह्रेति । (श्वसुर) ।
१५ धनं .... विना न भवति । (परिश्रम) ।
१६ कार्यं .... पृथक् न जायते (सीता) ।
१७ पिता सुतं .... निषेधति । (कलह) ।
१८ छात्रौ .... अन्तर्धत्तः (गुरु) ।
१९ पिता पुत्रं .... निवारयति (दुष्कर्म) ।
२० बालकः .... बिभेति (सर्प) ।

१४.३ अधोलिखितपदानां वाक्येषु प्रयोगं कुरुत ।

ग्रामात् । ताभ्याम् । तेभ्यः । तस्याः । त्वत् । मत् । युवाभ्याम् । आवाभ्याम् । युष्मभ्यम् । अस्मभ्यम् । हरेः । भानोः । नद्याः । सीतायाः । लताभ्यः । नीडात् । कृच्छ्रात् । पितुः । मात्रोः । भ्रातृणाम् । सर्वस्माद् । महतः । गच्छतः । हसन्त्याः । पयसः । राज्ञः । यूनः । भल्लुकाभ्याम् । पर्वताभ्याम् । शिखरेभ्यः । जलाशयात् । वलभ्याः । अस्मात् । आभ्याम् । एभ्यः । लुब्धकात् । विनयात् । धनात् । अन्यस्मात् । उदयगिरेः । संगाद् । देशेभ्यः । दिग्भ्यः ।

१४.४ कोष्ठस्थपदान्यनुसृत्य प्रश्नानामुत्तराणि लिखत ।

१ वानराः	कस्माद्	पतन्ति	(वृक्ष)
२ गावः	कस्माद्	बिभ्यति ?	(वृक)
३ यूयं	कुतः	आगच्छथ ?	(ग्राम)
४ वयं	कस्माद्	त्रस्यामः ?	(व्याघ्र)
५ कार्तिकः	कस्मात्	उत्तरः अस्ति ?	(माघ)
६ त्वं	कुतः	कार्यं करोषि ?	(चैत्र)
७ युवां	कस्माद्	अन्तर्धत्थः ?	(चौर)
८ युवतिः	कस्माद्	जिह्रेति ?	(युष्मद्)
९ पिता पुत्रीं	कस्माद्	निवारयति ?	(कुप्रवृत्तिः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१० माता त्वां	कुतः	निषेधति ?	दुर्जनसंसर्ग)
११ सीता	कस्मात्	गरीयसी अस्ति ?	(उमा)
१२ अध्ययनं	कस्मात्	पृथक् न भवति ?	(पुस्तक)
१३ यूयं	केभ्यः	त्रस्यथ ?	(सिंहः)
१४ युवां	काभ्यां	बिभ्यथः ?	(भल्लूक)
१५ सादिनः	केभ्यः	अवतरन्ति ?	(अश्व)
१६ मृगाः	कस्मात्	अन्तर्दधति ?	(केशरिन्)
१७ शिक्षकाः	कस्माद्	न विरमन्ति ?	(शिक्षण)
१८ यूयं	कस्माद्	बिभीथ ?	(भ्रष्टाचार)
१९ नद्यः	कुतः	प्रवहन्ति ?	(तुषाराद्रि)
२० सुखं	कस्माद् विना	न भवति ?	(धन)

१४.४. निम्नगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

महतपा नाम मुनिः गौतमवनम् अध्यासत । तेन आश्रमं निकषा काकमुखाद् भ्रष्टः मूषिकशावकः दृष्टः । ततः सः तेन मुनिना निवारकणैः संवर्धितः । कदाचिद् विडालः तं मूषिकं खादितुम् उपधावति स्म । तम् अवलोक्य मूषिकः मुनिक्रोडं प्राविशत् । ततः मुनिना उक्तम्- त्वं विडालाद् बिभेषि । मार्जारो भव इति । ततः सः कुक्कुरं दृष्ट्वा पलायते स्म । ततः मुनिना कथितम्- त्वं कुक्कुराद् बिभेषि, कुक्कुरो भव इति । ततः कुक्कुरः व्याघ्राद् बिभेति स्म । तत्पश्चात् तेन मुनिना कुक्कुराय व्याघ्रः कृतः । ततः सर्वे जनाः कथयन्ति स्म - अनेन मुनिना मूषिकः व्याघ्रतां नीतः । ततः व्याघ्रेण विचारितम् - "यावत् असौ मुनिः जीवति तावत् अपयशः भवति ।" इति विचिन्त्य व्याघ्रः मुनिं हन्तुं गतः । तद् ज्ञात्वा मुनिना सः पुनः मूषिक एव कृतः ।

१. महातपा मुनिः कम् अध्यासत ?
२. तेन आश्रमं निकंषा कः विलोकितः ?
३. मूषिकशावकः मुनिना कस्माद् भ्रष्टः दृष्टः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४. कुक्कुरः कस्माद् बिभेति स्म ?

५. व्याघ्रः किमर्थं मुनिं हन्तुम् अगच्छत् ?

६. अनेन का शिक्षा लभ्यते ?

१४.५. निम्नपदानि प्रयुत्य वाक्यानि रचयत ।

५१	५२	५३	५४	५५
एकपञ्चाशत्	द्विपञ्चाशत्	त्रिपञ्चाशत्	चतुःपञ्चाशत्	पञ्चपञ्चाशत्
५६	५७	५८	५९	६०
षट्पञ्चाशत्	सप्तपञ्चाशत्	अष्टपञ्ताशत्	नवपञ्चाशत्	षष्टिः
६१	६२	६३	६४	६५
एकषष्टिः	द्विषष्टिः	त्रिषष्टिः	चतुष्षष्टिः	पञ्चषष्टिः
६६	६७	६८	६९	७०
षट्षष्टिः	सप्तषष्टिः	अष्टषष्टिः	नवषष्टिः	सप्ततिः
७१	७२	७३	७४	७५
एकसप्ततिः	द्विसप्ततिः	त्रिसप्ततिः	चतुःसप्ततिः	पञ्चसप्ततिः
७६	७७	७८	७९	८०
षट्सप्ततिः	सप्तसप्ततिः	अष्टसप्ततिः	नवसप्ततिः	अशीतिः
८१	८२	८३	८४	८५
एकाशीतिः	द्वयशीतिः	त्र्यशीतिः	चतुरशीतिः	पञ्चाशीतिः
८६	८७	८८	८९	९०
षडशीतिः	सप्ताशीतिः	अष्टाशीतिः	नवाशीतिः	नवतिः
९१	९२	९३	९४	९५
एकनवतिः	द्विनवतिः	त्रिनवतिः	चतुर्नवतिः	पञ्चनवतिः
९६	९७	९८	९९	१००
षण्णवतिः	सप्तनवतिः	अष्टनवतिः	नवनवतिः	शतम्
१०००	१००००	१०००००	१००००००	१०,००००००
सहस्रम्	अयुतम्	लक्षम्	नियुतम्	कोटिः
१००००००००	१०००००००००	१०००००००००००	१००००००००००००	१०००००००००००००
दशकोटिः	अर्बुदम्	दर्शाबुदम्	खर्बम्	दशखर्बम्
१००००००००००००००	१०००००००००००००००	१००००००००००००००००	१०००००००००००००००००	
नीलम्	दशनीलम्	पद्मम्	दशपद्मम्	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चदशपाठः

(षष्ठी शेषे)

प्रथमपुरुष	एकव.	रामस्य	पुत्रः	गच्छति ?
	द्विव.	रामस्य	पुत्रौ	गच्छतः
	बहुव.	रामस्य	पुत्राः	गच्छन्ति
मध्यमपुरुषे	एकव.	मम	पुत्रः त्वं	गच्छसि
	द्विव.	आवयोः	पुत्रौ युवां	गच्छथः
	बहुव.	अस्माकं	पुत्राः यूयं	गच्छथ ।
उत्तमपुरुषे	एकव.	तव पुत्रः	अहं	गच्छामि ।
	द्विव.	युवयोःपुत्रौ	आवां	गच्छावः ।
	बहुव.	युष्माकं पुत्राः	वयं	गच्छामः ।

१५.१ अधोलिखितव्याक्यानि पठत ।

इयं कस्य रचना वर्तते ? त्वं विद्यायाः हेतोः विद्यापीठं गच्छसि । सः कस्य हेतोः (केन हेतुना) वसति ? इयं कृष्णास्य कृतिः वर्तते । पयसः पानेन शरीरं पुष्यति । इदं छात्रस्य शयितं विद्यते । हरिः अस्माकं सेवितव्यः अस्ति । इदं तव कार्यम् विद्यते । कृष्णः दिनस्य पञ्चकृत्वः खादति । छात्राः मासस्य द्विः पठन्ति । पर्वतस्य उपरि हिमानी विद्यते । गिरेः उपरिष्टात् मेघाः सन्ति । तेषां पुरः बालकाः क्रीडन्ति । प्रासादस्य उत्तरतः वृक्षाः सन्ति । नगरस्य अन्तिकं नदी वहति । ग्रामस्य दूरं वनम् विद्यते । तव कुशलम् भूयात् । विष्णोः तुल्यः केशवःनास्ति । विद्यायाः समं धनं न विद्यते । रामः मातुः स्मरति । नगरस्य समीपे जलाशयः वर्तते । मूर्खाणां दोषाः वहवः सन्ति । कृष्णस्य कृते किमपि नास्ति । गुरोः समक्षम् किं ब्रवीसि ? हंसानां मध्ये वकः न शोभते । गृहस्य अन्तः नराः निवसन्ति । ग्रामस्य दक्षिणतः गिरिः वर्तते । रुदतः शिशोः माता अगच्छत् । ते निवासस्य हेतोः गृहं यान्ति । रामः शतस्य दीव्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१५.२ कोष्ठस्थपदान्यनुसृत्य प्रश्नानामुत्तराणि लिखत ।

१ त्वं कस्य हेतोः विद्यालयं गच्छसि ?	(पठन)
२ इयं कस्य कृतिः वर्तते ?	(सीता)
३ एतानि केषां शयितानि विद्यन्ते ?	(हरि)
४ विष्णुः केषां सेवितव्यः अस्ति ?	(मनुज)
५ इदं केषां कार्यम् अस्ति ?	(युष्मद्)
६ कस्य उपरि हिमं विलसति ?	(हिमवत्)
७ कस्य उत्तरतः ब्रह्मपुत्रः वहति ?	(हिमालय)
८ कयोः अन्तिके पुत्रौ निवसतः ?	(मातृ, पितृ)
९ केषां मध्ये मूढः न शोभते ?	(बुध)
१० ते कस्य हेतोः वनं गच्छन्ति ?	(इन्धन)
११ त्वं कस्य समक्षं तिष्ठसि ?	(शिक्षक)
१२ केषां पुरः छात्राः वसन्ति ?	(गुरु)
१३ कस्य विश्वासः नास्ति	(श्रृङ्गिन्)
१४ नरः केषां श्रेष्ठः अस्ति ?	(प्राणिन्)
१५ केषां मध्ये रामः पटुः विद्यते ?	(छात्र)
१६ मूढाः केषां तुल्याः भवन्ति ?	(पशु)
१७ सिंहः केषां राजा वर्तते ?	(वन्यजन्तु)

१५.३ कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानं पूरयत ।

१ इयं .... रचना वर्तते	(किम्) ।
२ त्वं .... हेतोः वनं गच्छसि	(काष्ठ) ।
३ इदं .... शयितं विद्यते	(छात्र) ।
४ शिवः .... सेवितव्यः अस्ति	(तत्) ।
५ रामः .... पञ्चकृत्वः खादति	(दिवस) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६ वनं .... दूरं विद्यते (नगर) ।
७ .... उत्तरतः नदी वहति (ग्राम) ।
८ देशसेवनम् .... कर्तव्यं वर्तते (सर्व) ।
९ ...... उपरि वृक्षाः सन्ति (शिखर) ।
१० .... कुशलं भवतु (युष्मद्) ।
११ .... कार्यं नास्ति (अस्मद्) ।
१२ वयम् .... अपराधं सहामहे (तत्) ।
१३ .... पुत्राः आगच्छन्ति (राजन्) ।
१४ .... कार्यं वर्तते (अस्मद्) ।
१५ इदं पुस्तकं .... नास्ति (युष्मद्) ।
१६ ...... धर्मे मतिः न विद्यते (तत्) ।
१७ लोके .... महत्त्वम् अस्ति (विद्या) ।
१८ त्वं .... साक्षी असि (विवाद) ।
१९ मम भ्राता .... वस्त्रं ददाति (रजक) ।
२० सः नित्यं .... स्मरति (मातृ) ।

१५.४ निम्नपदानां वाक्येषु प्रयोगं कुरुत ।

देवस्य । कृष्णयोः । श्यामानाम् । रमायाः । सीतयोः । कमलानाम् । हरेः । कव्योः । सत्याः । नद्योः । सरिताम् । मातुः । पित्रोः । वधूनाम् । रात्रेः । शंभोः । ब्रह्मणः हेतोः । हसितम् । कर्तव्यम् । पञ्चकृत्वः । दूरम् । उत्तरतः । दक्षिणतः । उपरि । तव । युवयोः । युष्माकम् । मम । आवयोः । अस्माकम् । तेषाम् । सर्वेषाम् । तस्याः । तयोः । तासाम् । अस्य । अनयोः । एषाम् । श्रेष्ठः । उत्तमः । अस्याः । आसाम् । महताम् । विदुषाम् । विद्यायाः । वेधसः । विद्यार्थिनः । मनसाम् । जगतः ।

१५.५. निम्नलिखितगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्याधनं सर्वधनप्रधानम् इति यदुक्तं तत् सत्यम् । सर्वं धनं व्ययात् क्षयम् आप्नोति परं विद्याधनं सञ्चयाद् नाशम् आयाति । व्ययात् च वृद्धिं गच्छति । कुवेरस्य असीमः कोशः अपि व्ययात् एकदा रिक्तो भविष्यति परं विद्याधनस्य वैचित्र्यम् वर्तते यत् इदं मुहुः व्ययात् अपि क्षयं न गच्छति ।

ज्ञानार्थकस्य विद्धातोः विद्याशब्दः । कस्यचित् अपि पदार्थस्य सम्यग्ज्ञानं विद्या इति कथ्यते । विद्यया एव स्वकर्तव्यस्य ज्ञानं भवति । धर्मस्य ज्ञानं विद्यया एव भवति । पापपुण्ययोः ज्ञानं विद्यां विना न भवितुं शक्नोति । विद्या मानवस्य उपकारं करोति । सा माता इव रक्षति, पिता इव हितकार्ये नियोजयति । न कश्चिद् विद्यां चोरयितुं शक्तः । न कश्चित् तां वण्टयितुं समर्थः । विद्या कुरूपस्य रूपम् अस्ति, निर्धनानां धनं विद्यते । विद्या गुरूणाम् अपि गुरुः अस्ति ।

१. विद्याधनस्य किं वैशिष्ट्यम् ?

२. विद्यया केषां ज्ञानं भवति ?

३. विद्या कथं मानवानाम् उपकारं करोति ?

४. विद्या केषाम् रूपम् ?

५. विद्या केषां धनम् अस्ति, केषाम् च गुरुः वर्तते ?

६. विद्यां विना किं भवितुं न शक्नोति ?

१५.६. निम्नपदानि प्रयुज्य वाक्यानि रचयत ।

प्रथमः । द्वितीयः । तृतीयः । चतुर्थः । पञ्चमः । षष्ठः । सप्तमः । अष्टमः । नवमः । दशमः । एकादशः । द्वादशः । त्रयोदशः । पञ्चदशः । षोडशः । सप्तदशः । अष्टादशः । एकोनविंशतितमः । विंशतितमः । एकविंशतितमः । त्रिंशत्तमः । चत्वारिंशत्तमः । पञ्चाशत्तमः । षष्टितमः । सप्ततितमः । अशीतितमः । नवतितमः । शततमः । सहस्रतमः । प्रथमा । प्रथमम् । एकादशी । एकादशम् । विंशतितमी । विंशतितमम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडशपाठः

(सप्तम्यधिकरणे च)

प्रथमपुरुष	एकव.	सिंहः	वने	गर्जति ।
	द्विव.	सिंहौ	वनयोः	गर्जतः ।
	बहुव.	सिंहाः	वनेषु	गर्जन्ति ।
मध्यमपुरुषे	एकव.	त्वं	मार्गे	धावसि ।
	द्विव.	युवां	मार्गयोः	धावथः ।
	बहुव.	यूयं	मार्गेषु	धावथ ।
उत्तमपुरुषे	एकव.	अहं	गृहे	वसामि ।
	द्विव.	आवां	गृहयोः	वसावः ।
	बहुव.	वयं	गृहेषु	वसामः ।

१६.१ अधोलिखितवाक्यानि पठत ।

तेषां धर्मे मतिः विद्यते । वने सिंहाः वसन्ति । तिलेषु तैलं वर्तते । वर्षासु वृष्टिः भवति । गङ्गायां घोषः विद्यते । चर्मणि द्वीपिनं हन्ति । दन्तयोः कुञ्जरं हन्ति । केशेषु चमरीम् मारयति । नृषु ब्राह्मणः श्रेष्ठः अस्ति । धावत्सु केशवः श्रेष्ठः विद्यते । छात्रेषु मैत्रः पटुः अस्ति । अयं छात्रः व्याकरणे साधुः विद्यते । स द्यूते निपुणः अस्ति । सूर्ये अस्तङ्गते रावणः अगच्छत् । उदिते चन्द्रमसि तारकाः अदृश्यन्त । रुदति पुत्रे पिता अगच्छत् । असौ निद्रायाम् उत्सुकः विद्यते । राजा पृथिव्याम् ईश्वरः वर्तते । त्वं विवादे साक्षी असि । विपिनं ग्रामस्य दूरे विद्यते । स मित्रे विश्वसिति । माता पुत्रे स्निह्यति । श्यामः रहसि रमते । त्वयि किं न संभाव्यते । सा त्वयि अनुरक्ता अस्ति । भवति नृपत्वं युज्यते ।

१६.२ कोष्ठस्थपदान्यनुसृत्य रिक्तस्थानानि पूरयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१ मदोन्मत्ताः सिंहाः ....गर्जन्ति (वन) ।

२ अस्माकं मतिः .... वर्तते (विष्णु) ।

३ मम विश्वासः .... नास्ति (युष्मद्) ।

४ तैलानि .... वर्तन्ते (सर्षप) ।

५ सूर्यस्य आतपः .... वर्धते (ग्रीष्म) ।

६ .... भवनानि सन्ति । (नगर) ।

७ .... व्याघ्रं घातयति (चर्म) ।

८ ....कुञ्जरं मारयति (दन्त) ।

९ नृपतिः .... ईश्वरः वर्तते (पृथिवी) ।

१० नृपत्वं .... युज्यते (युष्मद्) ।

११ .... गृहीत्वा भृशम् आताडयत् (केश) ।

१२ गुरुः.......................... साधुः अस्ति । (अस्मद्) ।

१३ .... कालेषु रामः राजा अभूत् । (गच्छत्) ।

१४ ....पश्यति सर्पाः मत्स्यान् अखादन् (वक) ।

१५ .... सवितरि वायसः प्रबुद्धः अभूत् (अस्तङ्गत)

१६.३ समुचितपदानि प्रयुज्य प्रश्नानामुत्तराणि लिखत ।

१ यूयं कुत्र वसथ ?

२ कस्मिन् तव मतिः विद्यते ?

३ वृष्टिः कदा भवति ?

४ श्यामाः केषु कुशलाः सन्ति ?

५ कस्मिन् पश्यति रामः अगच्छत् ?

६ त्वं कस्मिन् कर्मणि उत्सुकः असि ?

७ तैलं कुत्र वर्तते ?

८ वीराः केषु शरान् मुञ्चन्ति ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९ त्वयि किं संभाव्यते ?

१० रात्री कदा भवति ?

११ कासु कृष्णा बहुक्षीरा विद्यते ?

१२ केषु कृष्णः चतुरः अस्ति ?

१३ यूयं कुत्र पठथ ?

१४ हिमालयः कुत्र वर्तते ?

१५ कस्मिन् सति दिनं भवति ?

१६ खगाः रात्रौ कुत्र वसन्ति ?

१७ तारकाः कुत्र द्योतन्ते ?

१८ विद्यार्थिनः कुत्र पठन्ति ?

१६.४ वाक्येषु प्रयोगं कुरुत ।

त्वयि । रमायाम् । तस्याम् । मयि । पश्यति । गच्छत्सु । राज्ञि । सर्वस्मिन् । युवयोः । आवयोः । तस्मिन् । तयोः । तासु । तस्याम् । तेषु । एषु । आसु । हरौ । चन्द्रे । वैकुण्ठे । अनयोः । अस्मिन् । यस्मिन् । यस्याम् । कस्याम् । कस्मिन् । कुत्र । केषु । सर्वस्मिन् ।

१६.५ अशुद्धीः संशोधयत ।

तव ऋते मम अन्यत् मित्रं नास्ति । उद्यानस्य परितः वृक्षाः सन्ति । प्रभुः निरपराधं भृत्यं क्रुध्यति । पिता पुत्रस्य प्रति सन्तुष्टः न अभवत् । दरिद्रः सदैव धनं स्पृहयति । स व्याघ्रस्य बिभेति । भवान् वने अधिवसन्तं रामम् अवोचत् । मित्रेण अन्यः कः विश्वासयोग्यः अस्ति । रामः केशवं न रोचते । उमेशः मां स्पृहयति । रामः पुत्रस्य सह गृहम् अगच्छत् । नदीभ्यः गङ्गा श्रेष्ठा । सूर्यः उदिते दिनम् अभूत् । वाटिकायाम् उत्तरेण नदी बहति । गृहस्य गन्तुं वयं न समर्थाः स्म । फलस्य गृहीत्वा केशवः गच्छति । भवनस्य आगत्य छात्राः पठन्ति । चन्द्रस्य विलोकयन् जनः हर्षम् अनुभवति । अहं हरिः सेवितव्यः । मैत्रस्य पूर्वदेशे चैत्रः अस्ति । शनैश्चरः ग्रहः अन्यतमः विद्यते । माघस्य उत्तरः फाल्गुनः अस्ति । बीजानाम् अङ्कुराः जायन्ते । सैनिकः भल्लूकस्य रक्षति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तदशपाठः

१७.१ अधोलिखितवाक्यानि पठत ।

१ रमेशः दोषं त्यजति
- गुरुः रमेशेन दोषं त्याजयति ।

२ रामः मारीचं हन्ति ।
- सीता रामेण मारीचं घातयति ।

३ नृपः धनं ददाति ।
- मन्त्री नृपेण धनं दापयति ।

४ पिता क्रीडनकं क्रीणाति
- वालः पित्रा क्रीडनकं क्रापयति ।

५ सुमन्त्रः रामं वनं नयति ।
- राजा सुमन्त्रेण रामं वनं नाययति ।

६ पाण्डवाः वनं गच्छन्ति ।
- कौरवाः पाण्डवान् वनं गमयन्ति ।

७ वालः चन्द्रं पश्यति ।
- माता वालं चन्द्रं दर्शयति ।

८ नृपः गीतं शृणोति ।
- सा नृपं गीतं श्रावयति ।

९ केशवः गृहं प्रविशति ।
- श्यामः केशवं गृहं प्रवेशयति ।

१० सः वृक्षम् आरोहति ।
- कृष्णः तं वृक्षम् आरोहयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११ नाविकः गङ्गाम् उत्तरति ।
- केशवः नाविकेन गङ्गाम् उत्तारयति ।

१२ निर्धनः भोजनं गृह्णाति ।
- भक्तः निर्धनं भोजनं ग्राहयति ।

१३ बालः नगरं प्राप्नोति ।
- पिता बालं नगरं प्रापयति ।

१४ सः शास्त्रं जानाति ।
- गुरुः तं शास्त्रं ज्ञापयति ।

१५ छात्रः पाठं पठति ।
- गुरुः छात्रं पाठं पाठयति ।

१६ शिशुः दुग्धं पिबति
- माता शिशुं दुग्धं पाययति ।

१७ कृष्णः अन्नं भुङ्क्ते ।
- यशोदा कृष्णम् अन्नं भोजयति ।

१७.२ प्रेरणार्थकवाक्येषु परिवर्तनं कुरुत ।

सः गृहं गच्छति । तौ श्वानं हतः । रमेशः फलं भुङ्क्ते । माता जलं पिबति । वयं पाठं पठामः । छात्रः शास्त्रम् अधीते । ते सूर्यं पश्यन्ति । आवां कथां शृणुवः । बालकाः कक्षायाम् प्रविशन्ति । वानराः तं वृक्षम् आरोहन्ति । यूयं नदीम् उत्तरथ । वयं धनं गृह्णीमः । पितरः नगरं प्राप्नुवन्ति । ते शास्त्राणि जानन्ति । भृत्यः भारं नयति । सेवकः कार्यं करोति । रामाः गृहम् अगच्छन् । वानरः फलम् अत्ति । मूर्खः सज्जनं तुदति । गोपालः व्रजं गाम् अवरुणद्धि । श्यामः कन्दुकेन क्रीडति । सेवकः कार्यं करोति । व्याघ्रः मृगान् हन्ति । चौराः द्रविणं हरन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७.३ निम्नवाक्यानि पठत ।

रामः गृहं आगच्छति । त्वं छात्रान् पाठयित्वा भोजनाय गच्छसि । ते देवान् समर्च्य नैवेद्यं भक्षयन्ति । रामं हरिम् च पूजय । केशवः मातरमपि पितरमपि प्रणमति । रामः कृष्णः वा गच्छतु । एषः काव्यं लिखति, पठति च । त्वं कवितां लिखसि किं वा पठसि । रामः गतवान् उत अत्रैव तिष्ठति । पूर्वं कुसुमं विकर्सति ततः फलानि जायन्ते । शीघ्रम् आगच्छ नोचेत् अन्यः लभते । सः मम उपकारं न स्मरति प्रत्युत मह्यमेव द्रुह्यति । रावणः सीताम् अहरत् अतः रामः रावणम् अघातयत् । सः यथेच्छं भक्षयति ततः एव रोगैः पीड्यते । अहं तस्मै हितं नोपदिशामि यत्सः न शृणोति । अहं पुनः आह्वयामि परन्तु सः न आगच्छति । गच्छसि चेद् गच्छ परं सावधानेन भवितव्यम् । इदं सुन्दरम् अस्ति किन्तु महार्घं विद्यते । शब्दः- द्विधा, यथा व्यक्तः अव्यक्तः च । यथा इच्छसि तथा कुरु । यद्यपि मया किमपि नोक्तम् तथापि सः कुपितवान् । श्यामः पाठं पठितुं गच्छति अहं च गच्छामि । यावत् शक्नोषि तावत् कुरु । त्वं गच्छसि चेत्तर्हि यथेच्छं गच्छ । छात्रैः सदा क्रीडनीयम्, एतत् न शोभते । अहं न आगच्छामि इति रामः अकथयत् । त्वं सम्यक् न पठसि, तेन गुरुः कुप्यति । यत् अतीव रक्तं तदेव वस्त्रं दत्तवान् । यः प्रथमां संख्यां लब्धवान् सः प्रहृष्टवान् । यत्र शीतम् अस्ति तत्र वाधा भवति । यदा सूर्यः उदेति तदा अन्धकारः नश्यति । यथा शीघ्रं भवति तथा कुरु ।

१७.४ संयुक्तवाक्येषु परिवर्तनं कुरुत ।

यः पठति, सः परीक्षाम् उत्तरति । यथा रामः गतवान् तथैव गोपालः अपि गतवान् । यदि त्वं अग्रे भविष्यसि अहम् अपि अनुसरिष्यामि । यथा त्वं महिषीं क्रीणासि तथैव गामपि क्रीणासि । यद्यपि दूरम् आगतवान् अस्मि तथापि मनः तत्रैव धावति । यद्यपि रोगः शान्तः तथापि दुर्वलः अस्मि । शीघ्रं वदसि चेद् वद अन्यथा अन्यस्मै ददामि । गच्छ गच्छसि चेत् कान्त, तत्रैव स्याज्जनिर्मम । गुरुः यथैव प्राज्ञे विद्यां वितरति तथैव जडेऽपि वितरति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७.५ मिश्रवाक्येषु परिवर्तनं कुरुत ।

पठन् रामः परीक्षायां साफल्यं लभते । ते बालाः क्रीडनमिव पठनम् अपि कुर्वन्ति । तस्य गृहिणी प्रियवादिनी सुशीला च विद्यते । भवते नगरवासः रोचते वा विपिनवासः रोचते । सः सासूयः माम् प्रेक्षते । सः पितरौ देववत् पूजयति, गुरुम् अपि संमानयति अतः तं लोकः सत्पुरुषं वदति । रामः अपि क्रीडति, गोपालः अपि नाभ्यस्यति अतः तौ परीक्षां नोत्तरिष्यतः । मदीयां हितोक्तिं गृहाण अन्यथा पश्चात्तप्यसे । तदीयं कर्मकौशलम् प्रशंसनीयं परं तम् आलस्यं प्रतिरुणद्धि । पूर्वं ध्वनिः उदेति ततः प्रतिध्वनिः प्रसरति । इदम् औषधं वातम् अनुलोमयति, कफम् च क्षपयति, पित्तम् च उद्रिक्तं शमयति ।

१७.६ सरलवाक्ये परिवर्तनं कुरुत ।

यः पठति स उत्तीर्णो भवति । सः गच्छति, सा गच्छति, तौ च गच्छतः । वयं गृहं गच्छामः तदनु पाठं पठामः । अहम् किमपि न कथयामि यत् सः कुप्यति । श्यामः न वदति, अतः अहम् अपि न वदामि । सः पाठं पाठयति परं छात्राः न स्मरन्ति । त्वम् अग्रे भव अहमपि अनुसरिष्यामि । पूर्वं कुसुमम् उदेति ततः फलं भविष्यति । गोविन्दः पाठं श्रावयति अतः गुरुः प्रसीदति । वयं मुहुः तं सान्त्वयामः परं सः धैर्यं न धारयति । सः कार्ये सहायं न ददाति प्रत्युत व्याघातं करोति । पुत्रः मार्गे अपतत् अतः तं माता उत्थापयति स्म । पूर्वं रामः अगमत् तदनु गोपालः अगच्छत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टादशपाठः

१८.१. निम्नसूत्राणि सस्वरं पठत ।

१. अइउण् २. ऋलृक् ३. एओङ् ४. ऐऔच् ५. हयवरट् ६. लण् ७. ञमङणनम् ८. झभञ् ९. घढधष् १०. जबगडदश् ११. खफछठथचटतव् १२. कपय् १३. शषसर् १४. हल् ।

१८.२. निम्नप्रश्नाः समाधेयाः ।

१. प्रत्याहारसूत्राणि कति, कानि च तानि ?

२. कति प्रत्याहाराः, के च ते ?

३. निम्नप्रत्याहारेषु कति वर्णाः सन्ति, के च ते ?

अक्	ऐच्	ञम्	वश्	झय्	शर्
इक्	अट्	ङम्	झश्	खय्	अल्
उक्	अण्	यञ्	जश्	चय्	हल्
एङ्	इण्	झञ्	बश्	यर्	बल्
अच्	यण्	झय्	छव्	झर्	रल्
इच्	अम्	अश्	चय्	खर्	झल्
एच्	यम्	हश्	झश्	चर्	शल्

४. प्रत्याहारसूत्रेषु प्रयुक्तस्य हल्वर्णस्य प्रयोजनं लिखत ।

१८.३. निम्नसूत्राणि पठत ।

१. वृद्धिरादैच् १।१।१

२. अदेङ् गुणः १।१।२

३. हलोऽनन्तराः संयोगः १।१।७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४. तुल्यास्यप्रयत्नं सवर्णम् १।१।९

५. अदर्शनं लोपः १।१।६०

६. आदिरन्त्येन सहेता १।१।७१

७. अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५

८. कृत्तद्धितसमासाश्च १।२।४६

९. भुवादयो धातवः १।३।१

१०. उपदेशेऽजनुनासिक इत् १।३।२

११. हलन्त्यम् १।३।३

१२. सुप्तिङन्तं पदम् १।४।१४

१८.४. अधोलिखितप्रश्नानामुत्तराणि लिखत ।

१. उक्तसूत्राणामर्थाः के ?

२.वृद्धि-गुण-संयोग-सवर्ण-लोप-प्रत्याहार-प्रातिपदिक-धातु-इत्-पदसंज्ञाविधायकानि सूत्राणि कानि ?

३. परस्परं मेलयत ।

क	ख
१. वृद्धिः	(क) आदिरन्त्येन सहेता
२. गुणः	(ख) अदर्शनं लोपः
३. संयोगः	(ग) तुल्यास्यप्रयत्नं सवर्णम्
४. सवर्णम्	(घ) सुप्तिङन्तं पदम्
५. लोपः	(ङ) उपदेशेऽजनुनासिक इत्
६. प्रत्याहारः	(च) अदेङ् गुणः
७. प्रातिपदिकम्	(छ) वृद्धिरादैच्
८. धातुः	(ज) हलोऽनन्तराः संयोगः
९. इत्	(झ) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्
१०. पदम्	(ञ) भुवादयो धातवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८.४. **निम्नसूत्राणि पठित्वाऽर्थं लिखत ।**

१ इको यणचि	६।१।७७
२. यचोऽयवायाव:	६।१।७८
३ आद् गुण:	६।१।८७
४ वृद्धिरेचि	६।१।८८
५ अक: सवर्णे दीर्घ:	६।१।१०१
६ एङः पदान्तादति	१।१।१०९
७ अतोरोरप्लुतादप्लुते	६।१।११३
८ हशि च	६।१।११४
९ झलां जशोऽन्ते	८।२।३९
१० ससजुषो रु:	८।२।६६
११ खरवसानयोर्विसजनीय:	८।३।१५
१२ मोनुऽस्वार:	८।३।२३
१३ विसर्जनीयस्य स:	८।३।३४
१४ स्तो: श्चुना श्चु:	८।४।४०
१५ ष्टुना ष्टु:	८।४।४१
१६ शश्छोऽटि	८।४।६३

१८.५. **निम्नप्रश्नानामुत्तराणि लिखत ।**

१ यण्-गुण-वृद्धि-दीर्घ-पूर्वरूप-उत्व-जश्त्व-विसर्ग-अनुस्वार-सत्व-श्चुत्व- ष्टुत्व-छत्वविधायकानि सूत्राणि कानि ?

२. परस्परं मेलयत ।

क	ख
१ यण्	१ शश्छोऽटि
२ गुण:	२ हशि च
३ वृद्धि:	३ झलां जशोऽन्ते
४ दीर्घ:	४ ससजुषो रु:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५ पूर्वरुपम्	५ खरवसानयोर्विसर्जनीय:
६ उत्वम्	६ मोऽनुस्वार:
७ जश्त्वम्	७ विसर्जनीयस्य स:
८ रुत्वम्	८ एचोऽयवायाव:
९ विसर्ग:	९ ष्टुना ष्टु:
१० अनुस्वार:	१० इको यणचि
११ सत्वम्	११ आद्गुण:
१२ श्चुत्वम्	१२ वृद्धिरेचि
१३ ष्टुत्वम्	१३ अक: सवर्णे दीर्घ:
१४ छत्वम्	१४ एङ: पदान्तादति
१५ अयादि	१५ स्तो: श्चुना श्चु:

३ प्रत्येकं सूत्राणां दशोदाहरणानि लिखत ।

१८.५ सन्धिविच्छेदं कुरुत ।

१. उपेन्द्र: । सुरेश: । तथेति । रमेश: । हितोपदेश: । गङ्गोदकम् । पीनोरु: । देवर्षि: । महर्षि: । तवल्कार: ।

२. यद्यपि । नद्युदकम् । इत्याह । प्रत्येकम् । प्रत्युपकार: । गुर्वादिश: । शिश्वैक्यम् । मध्वरि: । वध्वादेश: । पित्रनुमति: । लाकृति: ।

३. अद्यैव । दैवैश्वर्यम् । तथैव । विद्यैश्वर्यम् । तण्डुलौदनम् । महौषधि: । प्राच्र्छीति ।

४. मुरारि: । हिमालय: । दयार्णव: । विद्यालय: । गुरूपदेश: । गिरीन्द्र: । क्षितीश: । सुधीन्द्र: । श्रीश: । वधूत्सव: । होतृकार: ।

५. हरेऽव । लोकोऽयम् । गुरोऽव । वनेऽत्र । काकोऽवदत् । वृक्षेऽस्मिन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६. शिवोऽर्च्यः । देवोऽस्य । बालोऽस्ति । योऽपि । कोऽयम् । नृपोऽवदत् ।

७. शिवो वन्द्यः । गजो गच्छति । वालो वदति रामो हसति ।

८. हरिरवदत् । शिशुरागच्छत् । पितुरिच्छा वधूरेषा । गुरोर्भाषणम् । हरेर्द्रव्यम् ।

९. वागीशः । अजन्तः । षडाननः । षडेव । जगदीशः । उद्देश्यम् । सुबन्तः ।

१०. पुनः पृच्छति । देवः क्रीडति । श्यामाः पठन्ति । उमेशः करोति ।

११. हरिं वंन्दे । कार्यं कुरु । सत्यं वद । धर्मं चर ।

१२. कृष्णश्शेते । विष्णुस्त्रायते । हरिस्त्राता । गावस्तिष्ठन्ति । बालश्चलति । कश्चित् ।

१३. रामश्शेते । सच्चरितम् । कश्चित् । एतज्जलम् । उच्चारणम् । सज्जनः । शार्ङ्गिञ्जयः ।

१४. रामष्षष्ठः । रामष्टीकते । पेष्टा । इष्टः । दुष्टः । तट्टीका । उड्डीनः । विष्णुः । कृष्णः ।

१५. तच्छिवः । तच्छिला । सच्छीलः । उच्छायः ।

१८.६. सन्धिं विधाय सूत्राणि च लिखत ।

इति+आदि । नदी+अम्बु । देवी+उवाच । विधु+अंशः । मातृ+अनुमतिः । अमर+इन्द्रः । महा+ईशः । कृष्ण+उपदेशः । रमा+उदरम् । राज+ऋषिः । पितृ+ऋषिः । विद्या+एव । कुवेर+ऐश्वर्यम् । पक्व+ओदनम् । दैत्य+अरिः । वधू+अत्र । श्री+ईशः । तटे+अस्मिन् । लोको+अवदत् । बालो+अकथयत् । रामः+अर्च्यः । सः+अयम् । मनः+रथः । वाक्+इह । जगत्+ईश्वरः । शिवम्+वन्दे । असत्यम्+मा वद । हरिस्+शेते । सत्+चित् । विष्णुस्+तिष्ठति । षट्+नाम् । उत्+डीयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकोनविंशतितमः पाठः

१९.१. निम्नसूत्राणि पठित्वाऽर्थं लिखत ।

१ स्वतन्त्रः कर्ता १।४।५४

२ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा २।३।४६

३ संबोधने च २।३।४७

४ कर्तुरीप्सिततमं कर्म १।४।४९

५ कर्मणि द्वितीया २।३।२

६ अकथितञ्च १।४।५१

७ अकर्मकधातुभिर्योगे देशः कालो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम् ।

८ गतिबुद्धिप्रत्यवसानार्थशब्दकर्मकाणामणि कर्ता स णौ । १।४।५२

९ अधिशीङ्स्थासां कर्म १।४।४६

१० उपान्वध्याङ् वसः १।४।१८

११ उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥

१२ अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि

१३ अन्तरान्तरेण युक्ते २।३।४

१४ कालाध्वनोरत्यन्तसंयोगे २।३।५

१५ साधकतमं करणम् १।४।४२

१६ कर्तृकरणयोस्तृतीया २।३।१८

१७ सहयुक्तेऽप्रधाने २।३।१९

१८ येनाङ्गविकारः २।३।२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९ इत्थंभूतलक्षणे २।३।२१

२० कर्मणा यमभिप्रैति स संप्रदानम्

२१ चतुर्थी संप्रदाने २।४।३२

२२ क्रियया यमभिप्रैति सोऽपि संप्रदानम्।

२३ रुच्यर्थानां प्रीयमाणः १।४।३३

२४ धारेरुत्तमर्णः १।४।३५

२५ स्पृहेरीप्सितः।१।४।३६

२६ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः १।४।३७

२७ तादर्थ्ये चतुर्थी वाच्या।

२८ क्रियार्थोपपदस्य कर्मणि स्थानिनः २।३।१४

२९ तुमर्थाच्च भाववचनात् २।३।१५

३० नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च २।३।१६

३१ ध्रुवमपायेऽपादानम् १।४।२४

३२ अपादाने पञ्चमी २।३।२८

३३ जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्

३४ भीत्रार्थानां भयहेतुः १।४।२५

३५ जनिकर्तुः प्रकृतिः १।४।३०

३६ पृथक्विनानानाभिस्तृतीयान्यतरस्याम् २।३।३२

३७ दूरान्तिकार्थेभ्यो द्वितीया च २।३।३५

३८ षष्ठी शेषे २।३। ५०

३९ षष्ठी हेतुप्रयोगे २।३।२६

४० षष्ठ्यतसर्थप्रत्ययेन २।३।३०

४१ एनपा द्वितीया २।३।३१

४२ दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् २।३।३४

४३ कृत्वोर्थप्रयोगे कालेऽधिकरणे २।३।६४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४४ कर्तृकर्मणोः कृति २।३।३५

४५ अधिकरणवाचिनश्च २।३।६८

४६ न लोकाव्ययनिष्ठाखलर्थतृनाम् २।३।६९

४७ कृत्यानां कर्तरि वा २।३।७१

४८ तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् २।३।७२

४९ चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः २।३।७३

५० आधारोऽधिकरणम् १।४।४५

५१ सप्तम्यधिरणे च २।३।३६

५२ निमित्तात् कर्मयोगे

५३ यस्य च भावेन भावलक्षणम् २।३।३७

५४ यतश्च निर्धारणम् २।३।४१

५५ पञ्चमी विभक्ते २।३।४२

१९.२. प्रत्येकं सूत्राणां दशोदाहरणानि लिखत।

१९.३. कर्तृ-कर्म-करण-संप्रदानापादानाधिकरणसंज्ञाविधायकानि सूत्राणि लिखत।

१९.४. प्रथमा- द्वितीया- तृतीया- चतुर्थी- पञ्चमी- षष्ठी- सप्तमी-विभक्ति विधायकानि सूत्राणि लिखत।

१९.५. निम्नशब्दानां रूपाणि सस्वरं पठत।

रामः (अकारान्तपुंलिङ्गशब्दः)

विभक्तयः	एकव.	द्विवच.	बहुव.
प्रथमा	रामः	रामौ	रामाः
द्वितीया	रामम्	रामौ	रामान्
तृतीया	रामेण	रामाभ्याम्	रामैः
चतुर्थी	रामाय	रामाभ्याम्	रामेभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमी	रामात्(द्)	रामाभ्याम्	रामेभ्य:
षष्ठी	रामस्य	रामयो:	रामाणाम्
सप्तमी	रामे	रामयो:	रामेषु
संबोधनम्	हे राम	हे रामौ	हे रामा:

२ सीता (आकारान्तस्त्रीलिङ्गशब्द:)

विभक्तय:	एकव.	द्विवच.	बहुव.
प्रथमा	सीता	सीते	सीता:
द्वितीया	सीताम्	सीते	सीता:
तृतीया	सीतया	सीताभ्याम्	सीताभि:
चतुर्थी	सीतायै	सीताभ्याम्	सीताभ्य:
पञ्चमी	सीताया:	सीताभ्याम्	सीताभ्य:
षष्ठी	सीताया:	सीतयो:	सीतानाम्
सप्तमी	सीतायाम्	सीतयो:	सीतासु
संबोधनम्	हे सीते	हे सीते	हे सीता:

३. कवि: (इकारान्तपुंलिङ्ग:)

विभक्तय:	एकव.	द्विवच.	बहुवच.
प्रथमा	कवि:	कवी	कवय:
द्वितीया	कविम्	कवी	कवीन्
तृतीया	कविना	कविभ्याम्	कविभि:
चतुर्थी	कवये	कविभ्याम्	कविभ्य:
पञ्चमी	कवे:	कविभ्याम्	कविभ्य:
षष्ठी	कवे:	कव्यो:	कवीनाम्
सप्तमी	कवौ	कव्यो:	कविषु
संबोधनम्	हे कवे	हे कवी	हे कवय:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४. गौरी (ईकारान्तस्त्रीलिङ्गः)

विभक्त्यः	एकव.	द्विवच.	बहुव.
प्रथमा	गौरी	गौर्यौ	गौर्यः
द्वितीया	गौरीम्	गौर्यौ	गौरीः
तृतीया	गौर्या	गौरीभ्याम्	गौरीभिः
चतुर्थी	गौर्यै	गौरीभ्याम्	गौरीभ्यः
पञ्चमी	गौर्याः	गौरीभ्याम्	गौरीभ्यः
षष्ठी	गौर्याः	गौर्योः	गौरीणाम्
सप्तमी	गौर्याम्	गौर्योः	गौरीषु
संबोधनम्	हे गौरि	हे गौर्यौ	हे गौर्यः

५. विधुः(उकारान्तपुंलिङ्गः)

विभक्तयः	एकवच.	द्विवच.	बहुवच.
प्रथमा	विधुः	विधू	विधवः
द्वितीया	विधुम्	विधू	विधून्
तृतीया	विधुना	विधुभ्याम्	विधुभिः
चतुर्थी	विधवे	विधुभ्याम्	विधुभ्यः
पञ्चमी	विधोः	विधुभ्याम्	विधुभ्यः
षष्ठी	विधोः	विध्वोः	विधूनाम्
सप्तमी	विधौ	विध्वोः	विधुषु
संबोधनम्	हे विधो	हे विधू	हे विधवः

६. वधूः (ऊकारान्तस्त्रीलिङ्गः)

विभक्तयः	एकवच.	द्विवच.	बहुवच.
प्रथमा	वधूः	वध्वौ	वध्वः
द्वितीया	वधूम्	वध्वौ	वधूः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीया	वध्वा	वधूभ्याम्	वधूभिः
चतुर्थी	वध्वै	वधूभ्याम्	वधूभ्यः
पञ्चमी	वध्वाः	वधूभ्याम्	वधूभ्यः
षष्ठी	वध्वाः	वध्वोः	वधूनाम्
सप्तमी	वध्वाम्	वध्वोः	बधूषु
संबोधनम्	हे वधु	हे वध्वौ	हे वध्वः

७. पिता (ऋकारान्तपुलिङ्गः)

विभक्त्यः	एकवच.	द्विवच.	बहुवच.
प्रथमा	पिता	पितरौ	पितरः
द्वितीया	पितरम्	पितरौ	पितॄन्
तृतीया	पित्रा	पितृभ्याम्	पितृभिः
चतुर्थी	पित्रे	पितृभ्याम्	पितृभ्यः
पञ्चमी	पितुः	पितृभ्याम्	पितृभ्यः
षष्ठी	पितुः	पित्रोः	पितॄणाम्
सप्तमी	पितरि	पित्रोः	पितृषु
संबोधनम्	हे पितः	हे पितरौ	हे पितरः

८. माता (ऋकारान्तस्त्रीलिङ्गः)

विभक्तयः	एकवच.	द्विवच.	बहुवच.
प्रथमा	माता	मातरौ	मातरः
द्वितीया	मातरम्	मातरौ	मातॄः
तृतीया	मात्रा	मातृभ्याम्	मातृभिः
चतुर्थी	मात्रे	मातृभ्याम्	मातृभ्यः
पञ्चमी	मातुः	मातृभ्याम्	मातृभ्यः
षष्ठी	मातुः	मात्रोः	मातॄणाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तमी	मातरि	मात्रोः	मातृषु
संबोधनम्	हे मातः	हे मातरौ	हे मातरः

९. ज्ञानम् (अकारान्तनपुंसकलिङ्गः)

विभक्तयः	एकवच.	द्विवच.	बहुवच.
प्रथमा	ज्ञानम्	ज्ञाने	ज्ञानानि
द्वितीया	ज्ञानम्	ज्ञाने	ज्ञानानि
	शेषं रामवत् ।		

१०. वारि (इकारान्तनपुंसकलिङ्गः)

विभक्तयः	एकवच.	द्विवच.	बहुवच.
प्रथमा	वारि	वारिणी	वारीणि
द्वितीया	वारि	वारिणी	वारीणि
तृतीया	वारिणा	वारिभ्याम्	वारिभिः
चतुर्थी	वारिणे	वारिभ्याम्	वारिभ्यः
पञ्चमी	वारिणः	वारिभ्याम्	वारिभ्यः
षष्ठी	वारिणः	वारिणोः	वारीणाम्
सप्तमी	वारिणि	वारिणोः	वारिषु
संबोधनम्	हे वारे	हे वारिणी	हे वारीणि

११. श्रमत्शब्दः (हलन्तशब्दः तकारान्तः)

विभक्तयः	एकवच.	द्विवच.	बहुवच.
प्रथमा	श्रीमान्	श्रमन्तौ	श्रीमन्तः
द्वितीया	श्रीमन्तम्	श्रीमन्तौ	श्रीमतः
तृतीया	श्रीमता	श्रीमद्भ्याम्	श्रमद्भिः
चतुर्थी	श्रीमते	श्रीमद्भ्याम्	श्रीमद्भ्यः
पञ्चमी	श्रीमतः	श्रीमद्भ्याम्	श्रीमद्भ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठी	श्रीमत:	श्रीमतो:	श्रीमताम्
सप्तमी	श्रीमति	श्रीमतो:	श्रीमत्सु,
संबोधनम्	हे श्रीमन्	हे श्रमन्तौ	हे श्रीमन्त:

स्त्रियाम् - श्रीमती, श्रीमत्यौ श्रीमत्य: (नदीवत्)

नपुंसके - श्रीमत् श्रीमती श्रीमन्ति (तृतीयादौ पुंवत्)

१२. युष्मद्/अस्मद्शब्द:

विभक्तय:	एकवच.	द्विवच.	बहुवच.
प्रथमा	त्वम्, अहम्	युवाम्, आवाम्	यूयं, वयम्
द्वितीया	त्वाम्, माम्	युवाम्, आवाम्	युष्मान्, अस्मान्
तृतीया	त्वया, मया	युवाभ्याम्, आवाभ्याम्	युष्माभि:, अष्माभि:
चतुर्थी	तुभ्यम्, मह्यम्	युवाभ्याम्, आवाभ्याम्	युष्मभ्यम्, अस्मभ्यम्
पञ्चमी	त्वत्, मत्	युवाभ्याम्, आवाभ्याम्	युष्मत्, अस्मत्
षष्ठी	तव, मम	युवयो:, आवयो:	युष्माकम्, अस्माकम्
सप्तमी	त्वयि, मयि	युवयो:, आवयो:	युष्मासु, अस्मासु

१३. तत् शब्द:

विभक्तय:	एकवच.	द्विवच.	बहुवच.
प्रथमा	स:/सा/तत्	तौ/ते/ते	ते/ता:/ तानि
द्वितीया	तम्/ताम्/तत्	तौ/ते/ते	तान्/ता:/तानि
तृतीया	तेन/तया	ताभ्याम्	तै:/ताभि:/
चतुर्थी	तस्मै/तस्यै	ताभ्याम्	तेभ्य:/ताभ्य:
पञ्चमी	तस्मात्/तस्या:	ताभ्याम्	तेभ्य:/ताभ्य:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठी	तस्य/तस्याः	तयोः	तेषाम्/तासाम्
सप्तमी	तस्मिन्/तस्याम्	तयोः	तेषु/तासु

(तृतीयादौ नपुंसके पुंवत्)

१९.६. **निम्नशब्दानां सर्वासु विभक्तिषु रूपाणि लिखत।**

१ राम- भक्त- देव- नकुल- सर्वशब्दाः।

२ लता - सीता - बालिका - माला - दुर्गाशब्दाः।

३ हरि - कवि - कपि - वलि - यति - मुनिशब्दाः।

४ भानु - धातु - गुरु - साधु - चारु - शब्दाः।

५ नदी - श्रीमती - गौरी - सती - युवतीशब्दाः।

६ वधू - चमू - तनू - रज्जू - जम्बूशब्दाः।

७ सर्व - तत् - इदम् - युष्मद् - अस्मत् - किम्शब्दाः।

८ श्रीमत् - युवन् - राजन् - वाच्शब्दाः।

९ एक - द्वि - त्रि - चतुश्शब्दाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंशतितमपाठः

२०.१. निम्नपद्यानि सस्वरं पठत ।

समासः पदयोरैक्यमैच्छिको नियतः क्वचित्
प्रायः लोपोऽन्तर्विभक्तेस्तदर्थं ख्याति विग्रहः ॥१॥
समासभेदाः षोढा तत्पुरुषः कर्मधारयः ।
द्विगुर्द्वन्द्वोऽव्ययीभावो बहुव्रीहिरितीरिताः॥२॥
प्रायः प्रधानं चरमः पदार्थ आदितस्त्रिषु ।
उक्तस्तत्पुरुषः सोऽयं नवधा पूर्वगैः पदैः ॥३॥
योगः प्रायः समानाधिकरणप्रथमान्तयोः ।
कर्मधारय उक्तोऽसौ नवधाऽस्वपदस्थितेः ॥४॥
समाहारे द्विगुः संख्याविशेषणविशेष्ययोः ।
व्यूढयोगानेकतुल्ययोगो द्वन्द्वः स तु त्रिधा ॥५॥
प्रायः पूर्वेणान्वयेन योगः शब्दान्तरस्य तु
नित्योऽव्ययीभाव उक्तः सोऽयं द्वेधाऽव्ययस्थितेः ॥६॥
पदयोर्वा पदानां वा योगो बाह्यार्थबोधकः
बहुव्रीहिः क्वचिदलुक् सोऽयं दशविधो मतः ॥७॥

२०.२. निम्नप्रश्नानामुत्तराणि लिखत ।

१ अव्ययीभावसमासे कस्य पदार्थस्य प्राधान्यम् ? कतिविधश्च सः ? कानि च तस्योदाहरणानि ?

२ तत्पुरुष-द्विगु कर्मधारयसमासेषु कतमः पदार्थः प्रधानस्थानं लभते ?

३ तत्पुरुषकर्मधारसमासयोः को भेदः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४ तत्पुरुष: कतिविध: ? कानि च तेषामुदाहरणानि ?

५ कर्मधारयस्य कति भेदा: ? के च ते ? उदाहरणानि च कानि ?

६ द्वन्दसमासे कस्य पदार्थस्य प्रमुखं स्थानम् ? स कतिविध: ? उदाहरणानि च कानि ?

७ बहुव्रीहिसमासे कस्य पदार्थस्य प्राधान्यम् ? कति च तस्य भेदा: ? कानि च तेषामुदाहरणानि ?

२०.३. सोदाहरणं निम्नवाक्यानामाशयं प्रकाशयत ।

१ प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभाव:।

२ प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुष: ।

३ तत्पुरुषभेद: कर्मधारय: ।

४ कर्मधारयभेदो द्विगु: ।

५ प्रायेणान्यपदार्थप्रधानो बहुव्रीहि: ।

६ प्रायेणोभयपदार्थप्रधानो द्वन्द्व: ।

२०.४. समासङ्कुरुत

१ गङ्गाया: + समीपे =

२ रूपस्य + योग्यम् =

३ दु:खम् + आपन्न: =

४ सुखम् + प्राप्त: =

५ दिनम् + गत: =

६ दूरम् + गत: =

७ भात्रा + सम: =

८ अनुजेन + सदृश: =

९ तुभ्यं + हितम् =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१० मम + पुत्राः =

११ चन्द्रःइव + श्वेतः =

१२ चतुर्णां + युगानां समाहारः =

१३ त्रयाणां + लोकानां समाहारः =

१४ नीलम् + कमलम् =

१५ श्यामः + कृष्णः =

१६ लम्बम् + उदरम् यस्य सः=

१७ गृद्धस्येव + दृष्टिः यस्य सः=

१८ हरिः च + केशवः च =

१९ पाणी च + पादौ च =

२० मुखम् च + हस्तौ च + पादौ च =

२१ गावः च + मनुष्याःच =

२२ सर्पाः च + शूकरः च + व्याधाः च =

२०.५. विग्रहं प्रदर्शयत ।

१ अधिहरि । उपगङ्गम् । निर्मक्षिकम् । अतिहिमम् । अतिनिद्रम् । अनुरथम् । अनुहरि । अनुरूपम् । सचक्रम् । सहरि । सतृष्णम् । बहिर्वनम् । आमुक्तेः । मध्येगङ्गम् । उपराजम् । अध्यात्मम् । उपशरदम् । उपगिरि ।

२ कृष्णश्रितः । दुखातीतः । शोकपतितः । सुखप्राप्तः । भयापन्नः । प्राप्तजीवनः । आपन्नकष्टः । मासगतः । क्षणस्थायी । हरित्रातः । नखभिन्नः । खड्गहतः । मासपूर्वः । पितृसमः । मातृसदृशः । धान्योनम् । वाक्कलहः । आचारनिपुणः । शर्करामिश्रम् । द्विजार्थः । ब्राह्मणहितम् । भूतवलिः । चौरभयम् । अन्तिकागतः । दूरागतः । राजपुरुषः । सर्वश्वेतः । सर्वमहान् । सभापण्डितः । स्थालीपक्वः ।

३ नीलोत्पलम् । पीताम्बरः । कुपुत्रः । घनश्यामः । नृसिंहः । कृष्णश्वेतः । मुखकमलम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४ चतुर्युगम् । त्रिभुवनम् । पञ्चगवम् । पञ्चपात्रम् । त्रिलोकी । पञ्चमूली । पञ्चवटी । चतुर्यगम् । प्राचार्यः । कुम्भकारः । कम्बलदः ।

५ प्राप्तोदकः । चक्रपाणिः । चन्द्रशेखरः । पीताम्बरः । चन्द्रकान्तिः । दत्तचित्तः । दत्तधनः । निर्गतवलः । अपुत्रः । ससीतः । गङ्गभार्यः ।

६ रामलक्ष्मणौ । पितरौ । आहारनिद्राभयम् । पाणिपादम् । अहिनकुलम् । हस्तपादम् । सर्पनकुलम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिशिष्टभागः

पुस्तकेऽस्मिन् प्रयुक्ताः प्रमुखधातवस्तेषामर्थाश्च

(संस्कृतभाषायां नेपाल्याञ्च)

क्रमाङ्काः	धातवः	धातूनां परिचयः	सं. अ.	ने. अ.
१	अद	अदा. सक. पर. अनिट्	भक्षणे	खानु
२	अय	भ्वा. अक. आत्म. सेट्	गतौ	जानु
३	अर्च	भ्वा. सक. पर. सेट्	पूजने	पूजा गर्नु
४	अर्ज	चुरा. सक. उभ. सेट्	उपार्जने	कमाउनु
५	अर्थ	चुरा. द्विक. आत्म. सेट्	याचने	माग्नु
६	अस	अदा. अक. पर. सेट्	भुवि	हुनु, रहनु
७	अस	दिवा. सक. पर. सेट्	क्षेपणे	फ्याँक्नु
८	असू	कण्ड्वा. अक. उभ.	द्रोहकर्मणि	ईर्ष्या गर्नु
९	आप	स्वा. सक. पर. अनिट्	प्राप्तौ	पाउनु
१०	आस	अदा. अक. आ. सेट्	उपवेशने	बस्नु, रहनु
११	इ	अदा. सकर्म. पर. अनिट्	गतौ	हिड्नु, जानु
१२	इ*	अदा. सक. आत्म. अनिट्	अध्ययने	पढ्नु
१३	इष	तुदा. सक. पर. सेट्	वाञ्छायाम्	चाहनु
१४	ईक्ष	भ्वा. सक. आत्म. सेट्	दर्शने	हेर्नु
१५	ईड	अदा. सक. आत्म. सेट्	स्तुतौ	स्तुति गर्नु
१६	ईर्ष्य	भ्वा. अक. पर. सेट्	ईष्यार्थे	ईर्ष्या गर्नु
१७	ऊह	भ्वा. अक. आत्म. सेट्	वितर्के	तर्क गर्नु
१८	एध	भ्वा. अक. आत्म. सेट्	वृद्धौ	बढ्नु
१९	कथ	चुरा. सक. उभ. सेट्	कथने	भन्नु

* नियताधिपूर्वकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२०	कम्प	भ्वा. अक. आत्म. सेट्	कम्पने	काप्नु
२१	काङ्क्ष	भ्वा. सक. पर. सेट्	वाञ्छायाम्	इच्छा गर्नु
२२	काश	भ्वा. अक. आत्म. सेट्	प्रकाशे	चम्कनु
२३	कित*	भ्वा. सक. पर. सेट्	रोगप्रतिकारे	उपचार गर्नु
२४	कुप	दिवा. अक. पर. सेट्	कोपे	रिसाउनु
२५	कूज	भ्वा. अक. पर. सेट्	अव्यक्तशब्दे	अस्पष्ट आवाज निकाल्नु
२६	कृ	तना. सक. उभ. अनिट्	करणे	गर्नु
२७	कृत	तुदा. सक. पर. सेट्	छेदने	छिनाल्नु
२८	कृप	भ्वा. अक. आ. वेट्	कल्पने	कल्पना गर्नु
२९	कॄ	तुदा. सक. पर. सेट्	विक्षेपे	छर्नु
३०	क्रन्द	भ्वा. अक. पर. सेट्	क्रन्दने	रुनु
३१	क्रम	भ्वा. पर. अंक. सेट्	पादविक्षेपे	पाइला चाल्नु
३२	क्री	क्र्या. उभ. सक. अनिट्	क्रये	किन्नु
३३	क्रीड	भ्वा. अक. पर. सेट्	क्रीडायाम्	खेल्नु
३४	क्रुध	दिवा. अक. पर. अनिट्	कोपे	रिसाउनु
३५	क्रुश	भ्वा. अक. पर. अनिट्	रोदने	कराएर रुनु
३६	क्लिश	दिवा. अक. उभ. सेट्	उपतापे	पीडित हुनु
३७	क्षम	दिवा. सक. पर. सेट्	सहने	सहनु
३८	क्षम	भ्वा. सक. आ. वेट्	सहने	सहनु
३९	क्षिप	तुदा. सक. उभ. अनिट्	प्रेरणे	फ्याक्नु
४०	क्षुध	दिवा. अक. पर. अनिट्	क्षुधायाम्	भोकाउनु
४१	क्षुभ	भ्वा. अक. आ. सेट्	सञ्चलने	खुव चल्नु
४२	खन	भ्वा.सक. उभ. सेट्	विदारणे	खन्नु
४३	खाद	भ्वा. सक. पर. सेट्	भक्षणे	खानु

* संशये विपूर्वकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४४	गण	चुरा. सक. उभ. सेट्	संख्याने	गन्नु
४५	गवेष	चुरा. सक. उभ. सेट्	अन्वेषणे	खोजी गर्नु
४६	गम	भ्वा. सक. पर. अनिट्	गतौ	हिड्नु
४७	गर्ज	भ्वा. अक. पर. सेट्	शब्दे	गर्जनु
४८	गुञ्ज	भ्वा. अक. पर. सेट्	कूजने	गुज्नु
४९	गुप	भ्वा. सक. आत्म. सेट्	निन्दायाम्	निन्दा गर्नु
५०	गुम्फ	तुदा. सक. पर. सेट्	ग्रन्थने	गाँस्नु
५१	गॄ	तुदा. सक. पर. सेट्	निगिरणे	निल्नु
५२	गै	भ्वा. सक. पर. अनिट्	गाने	गाउनु
५३	ग्रह	क्र्या सक. उभ. सेट्	ग्रहणे	ग्रहण गर्नु
५४	ग्लै	भ्वा. अक. पर. सेट्	विषादे	खिन्न हुनु
५५	घट	भ्वा. अक. आत्म. सेट्	चेष्टायाम्	चेष्टा गर्नु
५६	घुष	चुरा. सक. उभ. सेट्	रवे	शब्द गर्नु
५७	घ्रा	भ्वा. अक. पर. अनिट्	गन्धोपादाने	सुँघ्नु
५८	चकास	अदा. अक. पर. सेट्	दीप्तौ	चम्कनु
५९	चम	भ्वा. सक. पर. सेट्	अदने	खानु
६०	चर	भ्वा. सक. पर. सेट्	गतौ	हिड्नु
६१	चर्च	चुरा. सक. उभ. सेट्	अध्ययने	चर्चा गर्नु
६२	चर्व	भ्वा. सक. पर. सेट्	भक्षणे	खानु
६३	चल	भ्वा. अक. पर. सेट्	चलने	चल्नु, हिड्नु
६४	चि	भ्वा. द्विक. उभ. अनिट्	चयने	टिप्नु, चुन्नु
६५	चिन्त	चुरा. सक. उभ. सेट्	चिन्तने	चिन्तन गर्नु
६६	चुम्ब	भ्वा. सक. पर. सेट्	चुम्बने	म्वाइँ खानु
६७	चुर	चुरा. सक. उभ. सेट्	स्तेये	चोर्नु
६८	चेष्ट	भ्वा. अक. आत्म. सेट्	चेष्टायाम्	चेष्टा गर्नु
६९	च्युत	भ्वा. अक. पर. सेट्	क्षरणे	चुहुनु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७०	छद	चुरा. सक. उभ. सेट्	संवरणे	ढाक्नु
७१	छिद	रुधा. सक. उभ. अनिट्	छेदने	छिनाल्नु
७२	जन	दिवा. अक. आत्म. सेट्	जनने	जन्मनु
७३	जप	भ्वा. सक. पर. सेट्	जपने	जप्नु
७४	जि	क्र्या द्विक. पर. अनिट्	जये	जित्नु
७५	जीव	भ्वा. अक. पर. सेट्	प्राणने	बाँच्नु
७६	जृम्भ	भ्वा. अक. आत्म. सेट्	जृम्भणे	हाइ गर्नु
७७	जॄ	दिवा. अक. पर. सेट्	जरायाम्	बूढो हुनु
७८	ज्ञा	क्र्या. सक. पर. अनिट्	बोधने	जान्नु
७९	ज्वल	भ्वा. अक. पर. सेट्	ज्वलने	बल्नु
८०	टङ्क	चुरा. सक. उभ. सेट्	विदारणे	टङ्कण गर्नु
८१	डी	भ्वादि. अक. आत्म. सेट्.	नभो गतौ	उड्नु
८२	तड	चुरा. सक. उभ.सेट्	ताडने	हिर्काउनु
८३	तन	तना. सक. उभ. सेट्	विस्तारे	फैलाउनु
८४	तप	भ्वा. अक. पर. अनिट्	तापे	तात्नु
८५	तर्ज	चुरा. सक. उभ. सेट्	तर्जने	डाँट्नु
८६	तिज	चुरा. सक. उभ. सेट्	तेजने	उध्याउनु
८७	तिज	भ्वा. सक. आत्म. सेट्	क्षमायाम्	सहनु
८८	तुद	तुदा. सक. उभ. अनिट्	व्यथने	पीडा दिनु
९०	तुष	दिवा. अक. पर. अनिट्	तोषे	खुसी हुनु
९१	तॄ	भ्वा. सक. पर. सेट्	तरणे	तर्नु
९२	तृप*	दिवा. अक. पर. वेट्	पृतौ	तृप्त हुनु
९३	त्यज	भ्वा. सक. पर. अनिट्	त्यागे	छोड्नु
९४	त्रप	भ्वा. अक. आत्म. वेट्	लज्जायाम्	लाज मान्नु

* प्रीणने तु सकर्मक : ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९५	त्रस	दिवा. अक. पर. सेट्	त्रासे	डराउनु
९६	त्रुट	तुदा. अक. पर. सेट्	द्वैधीभावे	टुट्नु
९७	त्रै	भ्वा. सक. आत्म. अनिट्	पालने	रक्षा गर्नु
९८	त्वर	भ्वा. अक. आत्म. सेट्	वेगे	हतारिनु
९९	दण्ड	चुरा. द्विक. उभ. सेट्	दण्डने	दण्ड दिनु
१००	दंश	भ्वा.*सक. पर. अनिट्	दंशने	डस्नु
१०१	दह	भ्वा. सक. पर. अनिट्	दाहे	डढाउनु
१०२	दा	जुहो. सक. उभ. अनिट्	दाने	दिनु
१०३	दिव	दिवा. पर. अ./स. सेट्	क्रीडादिषु	क्रीडा गर्नु आदि
१०४	दिश	तुदा. सक. उभ. अनिट्	देशने	उच्चारण गर्नु
१०५	दीप	दिवा. अक. आत्म. सेट्	कान्तौ	चम्कनु
१०६	दुष	दिवा. अक. पर. अनिट्	दोषे	दोष दिनु
१०७	दुह	अदा. द्वि. उभ. अनिट्	दोहने	दुहुनु
१०८	दृ	तुदा. सक. आत्म. अनिट्	आदरे	आदर गर्नु
१०९	दृश	भ्वा. सक. पर. अनिट्	दर्शने	हेर्नु
११०	दृ	क्र्या. सक. पर. सेट्	विदारे	दार्नु
११२	द्युत	भ्वा. अक. आत्म. सेट्	विद्योते	चम्कनु
११३	द्रु	भ्वा. अक. पर. अनिट्	द्रवे	पग्लनु
११४	द्रुह	दिवा. अक. पर. वेट्	द्रोहे	द्रोह गर्नु
११५	धा	जुहो. सक. उभ. अनिट्	धारणे, पोषणे च	धारण र पोषण गर्नु
११६	धाव	भ्वा. उभ. अक. सेट्	गतिशुद्ध्योः	हिड्नु र धुनु
११७	धृ	भ्वा. उभ. सक. अनिट्	धारणे	धारण गर्नु
११८	ध्वन	भ्वा. अक. पर. सेट्	शब्दे	शब्द निकाल्नु
११९	ध्मा	भ्वा. सक. पर. सेट्	धमने	फुक्नुं

* शब्दे त्वकर्मकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२०	ध्यै	भ्वा. सक. पर. अनिट्	चिन्तायाम्	ध्यान गर्नु
१२१	नद	भ्वा. अक. पर. सेट्	शब्दे	बज्नु
१२२	नन्द	भ्वा. अक. पर. सेट्	आनन्दे	खुशी हुनु
१२३	नम	भ्वा. सक. पर. अनिट्	नमने	ढोग्नु
१२४	नश	दिवा. अक. पर. वेट्	नाशे	नाश हुनु
१२५	निन्द	भ्वा. सक. पर. सेट्	निन्दायाम्	निन्दा गर्नु
१२६	नी	भ्वा. द्विक. उभ. अनिट्	प्रापणे	लैजानु
१२७	नुद	तुदा. सक. उभ. अनिट्	प्रेरणे	चल्नु
१२८	नृत	दिवा. अक. पर. सेट्	नर्तने	नाच्नु
१२९	पच	भ्वा. सक. उभ. अनिट्	पाके	पकाउनु
१३०	पठ	भ्वा. सक. पर. सेट्	पठने	पढ्नु
१३१	पत	भ्वा. अक. पर. सेट्	पतने	खस्नु
१३२	पद	दिवा. सक. आत्म. अनिट्	गतौ	हिड्नु
१३३	पा	भ्वा. सक. पर. अनिट्	पाने	पिउनु
१३४	पा	अदा. सक. पर. अनिट्	रक्षणे	रक्षा गर्नु
१३५	पाल	चुरा. सक. उभ. सेट्	रक्षणे	रक्षा गर्नु
१३६	पीड	चुरा. सक. उभ. सेट्	पीडने	पीडा दिनु
१३७	पुष	दिवा. सक. पर. अनिट्	पुष्टौ	पुष्ट हुनु
१३८	पुष्प	दिवा. अक. पर. सेट्	विकासे	फुल्नु
१३९	पूज	चुरा. सक. उभ. सेट्	पूजने	पूजा गर्नु
१४०	पूर	चुरा. सक. उभय. सेट्	पूर्तौ	भर्नु
१४१	प्रच्छ	तुदा. द्विक. पर. अनिट्	जिज्ञासायाम्	सोध्नु
१४२	प्लव	भ्वा. अक. आत्म. सेट्	प्लवने	उत्रनु
१४३	फल	भ्वा. सक. पर. सेट्	निष्पत्तौ	फल्नु
१४४	फुल्ल	भ्वा. अक. पर. सेट्	विकाशे	फुल्नु
१४५	बुध	भ्वा. सक. पर. सेट्	ज्ञाने	जान्नु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१४६	ब्रू	अदा. द्विक. उभ. सेट्	कथने	भन्नु
१४७	भक्ष	चुरा. सक. उभ. सेट्	भक्षणे	खानु
१४८	भज	भ्वा. उभ. सक. अनिट्	सेवायाम्	भज्नु
१४९	भर्त्स	चुरा. उभ. सक. सेट्	भर्त्सने	गाली गर्नु
१५०	भा	अदा. अक. पर. अनिट्	दीप्तौ	चम्कनु
१५१	भाष	भ्वा. अक. आत्म. सेट्	कथने	भन्नु
१५२	भास	भ्वा. अक. आत्म. सेट्	दीप्तौ	शोभित हुनु
१५३	भिक्ष	भ्वा. द्विक. आत्म. सेट्	याचने	माग्नु
१५४	भी	जुहो. अक. पर. अनिट्	भये	डराउनु
१५५	भू	भ्वा. अक. पर. सेट्	सत्तायाम्	हुनु
१५६	भूष	चुरा. सक. उभ. सेट्	भूषणे	सिगार्नु
१५७	भृ	जुहो. सक. परस्मै. अनिट्	भरणे, पोषणे	पालन, पोषण गर्नु
१५८	भ्रम	भ्वा. पर. अक. सेट्	भ्रमणे	घुम्नु
१५९	भ्रस्ज	तुदा. उभ. सक. अनिट्	पाके	भुट्नु
१६०	भ्राज	भ्वा. आत्म. अक. सेट्	दीप्तौ	चम्कनु
१६१	मण्ड	भ्वा. पर. सक. सेट्	भूषणे	सिगार्नु
१६२	मन	तना. आत्म. सक. सेट्	बोधे	ठान्नु
१६३	मन्त्र	चुरा. आत्म. सक. सेट्	गुप्त परिभाषणे	गोप्य कुरा गर्नु
१६४	मन्थ	क्र्या. पर. सक. सेट्	विलोडे	मथ्नु
१६५	मस्ज	तुदा. पर. अक. अनिट्	मज्जने	डुब्नु
१६६	मा	अदा. पर. सक. अनिट्	माने	नाप्नु
१६७	मान	भ्वा. आत्म. सक. सेट्	विचारणे	छलफल गर्नु, विचार गर्नु
१६८	मार्ग	चुरा. उभ. सक. सेट्	अन्वेषणे	खोज्नु
१६९	मार्ज	चुरा. उभ. सक. सेट्	मार्जने	सफा/शुद्ध गर्नु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७०	मिल	तुदा. उभ. अक. सेट्	श्लेषे	मिल्नु
१७१	मील	भ्वा. पर. अक. सेट्	निमेषणे	चिम्लनु
१७२	मुच	तुदा. उभ. सक. अनिट्	मोचने	छोडनु
१७३	मुष	क्र्या. पर. द्विक. सेट्	स्तेये	चोर्नु
१७४	मूर्छ	भ्वा. पर. अक. सेट्	मोहे	मूर्छा पर्नु
१७५	मुह	दिवा. पर. अक. सेट्	विमोहे	मोहित हुनु
१७६	मृश	भ्वा. पर. सक. सेट्	परामर्शे	सल्लाह लिनु
१७७	यज	भ्वा. उभ. सक. अनिट्	यागे	यज्ञ गर्नु
१७८	यत	भ्वा. आत्म. अक. सेट्	प्रयत्ने	प्रयास गर्नु
१७९	या	अदा. पर. सक. अनिट्	गतौ	जानु
१८०	याच	भ्वा. उभ. द्विक. सेट्	याचने	माग्नु
१८१	युज	रुधा. उभ. सक. अनिट्	योगे	जोडिनु
१८२	युध	दिवा. सक. आत्म. अनिट्	योधने	लड्नु
१८३	रक्ष	भ्वा. सक. पर. सेट्	रक्षणे	रक्षा गर्नु
१८४	रच	चुरा. सक. उभ. सेट्	विधाने	रच्नु
१८५	रञ्ज*	दिवा. उभ. सक. अनिट्	रञ्जने, प्रीतौ च	रँगाउनु, खुशी हुनु
१८६	रभ	भ्वा. आत्म. सक. अनिट्	आरम्भे	आरम्भ गर्नु
१८७	रम	भ्वा. आत्म. अक. अनिट्	क्रीडायाम्	खेल्नु
१८८	रुच	भ्वा. आत्म. अक. सेट्	प्रीतौ	रुचाउनु
१८९	रुद	अदा. अक. पर. सेट्	रोदने	रुनु
१९०	रुध	रुधा. द्विक. उभ. अनिट्	आवरणे	थुन्नु, रोक्नु
१९१	रुह	भ्वा. अक. पर. अनिट्	रोहणे	उम्रनु
१९२	लभ	भ्वा. सक. आत्म. अनिट्	प्राप्तौ	पाउनु
१९३	लस	भ्वा. अक. पर. सेट्	दीप्तौ	शोभित हुनु

* प्रीतौ त्वकर्मकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९४	लष्ज	भ्वाा. अक. आत्म. सेट्	व्रीडायाम्	लजाउनु
१९५	लिख	तुदा. सक. पर. सेट्	लेखने	लेख्नु
१९६	लिप	तुदा. सक. उभ. अनिट्	लेपने	लिप्नु
१९७	लू	क्र्या. सक. उभ. सेट्	छेदने	काट्नु
१९८	लोक	भ्वा. सक. आत्म. सेट्	दर्शने	हेर्नु
१९९	लोच	भ्वा. सक. आत्म. सेट्	दर्शने	हेर्नु
२००	वच	अदा. अक. पर. अनिट्	व्यक्तवाचि	स्पष्ट बोल्नु
२०१	वण्ट	चु. सक. उभ. सेट्	विभागे	बाड्नु
२०२	वद	भ्वा. सक. पर. सेट्	वाचि	बोल्नु
२०३	वप	भ्वा. सक. उभ. सेट्	बीजसन्ताने	रोप्नु
२०४	वम	भ्वा. सक. उभ. सेट्	उद्गिरणे	छाद्नु
२०५	वस	भ्वा. अक. पर. अनिट्	निवासे	बस्नु
२०६	वस	अदा. सक. आत्म. सेट्	आच्छादने	ढाक्नु
२०७	वह	भ्वा. अक. उभ. अनिट्	प्रापणे	पुऱ्याउनु, बग्नु
२०८	वर्ष	भ्वा. उभ. अक. सेट्	वर्षणे	बर्सनु
२०९	वाछ	भ्वा. सक. पर. सेट्	वाञ्छायाम्	इच्छा गर्नु
२१०	विद	अदा. सक. पर. सेट्	ज्ञाने	जान्नु
२११	विद	दिवा. अक. आत्म. अनिट्	भुवि	रहनु
२१२	विश	तुदा. पर. अक. अनिट्	प्रवेशे	प्रवेश गर्नु
२१३	वृत	भ्वा. आत्म. अक. सेट्	वर्तने	रहनु
२१४	वृध	भ्वा. आत्म. अक. सेट्	वृद्धौ	बढ्नु
२१५	वेप	भ्वा. आत्म. अक. सेट्	कम्पने	काप्नु
२१६	व्यथ	भ्वा. आत्म. अक. सेट्	दुःखे	दुःखित हुनु
२१७	शक	स्वा. पर. सक. अनिट्	शक्तौ	सक्नु
२१८	शक	भ्वा. आत्म. सक. सेट्	सन्देहे	शंका गर्नु
२१९	शास	अदादि. पर. द्विक. सेट्	शासने	शिक्षा दिनु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२०	शिक्ष	भ्वा. आत्म. सक. सेट्	शिक्षणे	सिक्नु
२२१	शी	अदा. आत्म. अक. सेट्	शयने	सुत्नु
२२२	शुभ	भ्वा. आत्म. अक. सेट्	दीप्तौ	सुहाउनु
२२३	श्वस	अदा. पर. अक. सेट्	प्राणने	सास फेर्नु
२२४	श्रि	भ्वा. उभ. सक. सेट्	सेवने	सेवा गर्नु
२२५	श्रु	भ्वा. पर. सक. अनिट्	श्रवणे	सुन्नु
२२६	श्लाघ	भ्वा. आत्म. सक. सेट्	प्रशंसने	प्रशंसा गर्नु
२२७	सद	तुदा. पर. सक. अनिट्	विषादे गतौ च	दु:ख पाउनु, हिड्नु
२२८	सह	भ्वा. आत्म. सक. सेट्	सहने	सहनु
२२९	सान्त्व	चुरा. उभ. सक. सेट्	सान्त्वने	सान्त्वना दिनु
२३०	सिच	तुदा. उभ. सक. अनिट्	सेचने	भिजाउनु
२३१	सिध	भ्वा. पर. सक. सेट्	गतौ	हिड्नु
२३२	सिव	दिवा. पर. सक. सेट्	तन्तुसन्ताने	सिउनु
२३३	सू	दिवा. आत्म. सक. वेट्	प्रसवे	जन्माउनु
२३४	सूच	चुरा. उभ. सक. सेट्	सूचने	सूचना गर्नु
२३५	सृ	भ्वा. पर. सक. अनिट्	गतौ	सर्नु
२३६	सृज	तुदा. पर. सक. अनिट्	विसर्गे	सृष्टि गर्नु
२३७	सेव	भ्वा. आत्म. सक. सेट्	सेवने	सेवा गर्नु
२३८	स्खल	भ्वा. पर. सक. सेट्	स्खलने	खस्नु
२३९	स्था	भ्वा. अक. पर. अनिट्	गतिनिवृत्तौ	रहनु
२४०	स्ना	अदा. अक. पर. अनिट्	शौचे	नहाउनु
२४१	स्निह	दिवा. सक. पर. वेट्	स्नेहे	माया गर्नु
२४२	स्पन्द	भ्वा. आत्म. अक. सेट्	किञ्चित् चलने	केही चल्नु
२४३	स्पृह	चुरा. उभ. सक. सेट्	ईप्सायाम्	इच्छा गर्नु
२४४	स्पृश	तुदा. पर. सक. अनिट्	स्पर्शे	छुनु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२४५	स्फुट	तुदा. पर. अक. सेट्	विकसने	प्रकट हुनु
२४६	स्मृ	भ्वा. पर. सक. अनिट्	स्मरणे	संझनु
२४७	स्वप	अदा. पर. अक. अनिट्	स्वप्ने	सुत्नु
२४८	स्रंश	भ्वा. आत्म. अक. सेट्	अवस्रंसने	तल सर्नु
२४९	हन	अदा. पर. सक. अनिट्	हिंसायां गतौ च	मार्नु, हिड्नु
२५०	हस	भ्वा. पर. अक. सेट्	हसने	हाँस्नु
२५१	हा	जुहो. पर. सक. अनिट्	त्यागे	छोड्नु
२५२	हृ	भ्वा. उभ. द्विक. अनिट्	हरणे	हर्नु
२५३	ह्री	जुहो. पर. अक. अनिट्	लज्जायां	लजाउनु
२५४	ह्वे	भ्वा. उभ. सक. अनिट्	स्पर्धायाम् शब्दे च	स्पर्धा गर्नु बोलाउनु

सोपसर्गाणां प्रमुखधातूनां प्रयोगास्तेषामर्थाश्च

अय - पलायते (भाग्छ) उदयते (उदाउँछ) निलयते (लुक्छ)

अर्थ - प्रार्थयते (प्रार्थना गर्छ) अभ्यर्थयते (इच्छा गर्छ) अभ्यर्थयते (प्रार्थना गर्छ)

अस - अभ्यस्यति (अभ्यास गर्छ) निरस्यति (हटाउँछ)

आप - व्याप्नोति (ढाक्छ) समाप्नोति (पूरा गर्छ)

आस् - अध्यास्ते (बस्छ) उपास्ते (पूजा गर्छ) अन्वास्यते (सेवा गर्छ)

इ - अवेति (जान्दछ) प्रत्येति (विश्वास गर्छ) उदेति (उदाउँछ) उपैति (नजिक जान्छ) अभ्येति (सामुन्ने आउँछ) अन्वेति (पछि लाग्छ) अपैति (हट्छ) अभ्युपैति (प्राप्त हुन्छ) प्रैति (मर्छ)

ईक्ष - अपेक्षते (चाहना राख्छ) उपेक्षते (उपेक्षा गर्छ) परीक्षते (परीक्षा लिन्छ) निरीक्षते (हेर्छ) उत्प्रेक्षते (अन्दाज गर्छ)

कृ - अनुकरोति (नक्कल गर्छ) अधिकरोति (अधिकार जमाउँछ) अपकरोति - (अपकार गर्छ) प्रकरोति (बलात्कार गर्छ) उदाकरोति (डर देखाउँछ) प्रतिकरोति (प्रतीकार गर्छ) उपकरोति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(सेवा गर्छ, उपकार गर्छ) विकरोति (विकार पैदा गर्छ) परिष्करोति (सजाउँछ) निराकरोति (हटाउँछ)

क्रम - अतिक्रामति (नाघ्दछ) अपक्रामति (टाढा जान्छ) आक्रामति (आक्रमण गर्छ) निष्क्रामति (निस्कन्छ) उपक्रमते (प्रारम्भगर्छ) परिक्रामति (घुम्छ) विक्रामति (हिड्छ) संक्रामति (सर्छ)

क्षिप - अवक्षिपति (निन्दा गर्छ) आक्षिपति (अपमान गर्छ) उत्क्षिपति (माथि फ्याँक्छ) संक्षिपति (छोट्याउँछ)

गम - अनुगच्छति (पछि लाग्छ) अवगच्छति (जान्दछ) अधिगच्छति (प्राप्त गर्छ) आगच्छति (आउँछ) प्रत्यागच्छति (फर्कन्छ) निर्गच्छति (निक्लन्छ) उद्गच्छति (उड्छ) प्रत्युद्गच्छति (लिन जान्छ)

ग्रह - निर्गृह्णाति (दण्ड दिन्छ) अनुगृह्णाति (दया गर्छ) विगृह्णाति (झगडा गर्छ) प्रतिगृह्णाति (स्वीकार गर्छ)

चर - अतिचरति (अत्याचार गर्छ) आचरति (व्यवहार गर्छ) अनुचरति (पछि लाग्छ) परिचरति (सेवा गर्छ) संचरति (आवत-जावत गर्छ) प्रचरति (प्रचार हुन्छ) उपचरति (सेवा गर्छ)

चि - उपचिनोति (बढाउँछ) अपचिनोति (घटाउँछ) अवचिनोति (टिप्छ) निश्चिनोति (निश्चय गर्छ) आचिनोति (ओछ्याउँछ) सञ्चिनोति (जम्मा गर्छ)

ज्ञा - अनुजानाति (आज्ञा दिन्छ) प्रतिज्ञानाति (प्रतिज्ञा गर्छ) अवजानाति (अनादर गर्छ)

तप् - उत्तपति (तताउँछ) उत्तपते (सेक्छ)

तृ - अवतरति (ओर्लिन्छ) उत्तरति (उत्रन्छ) वितरति (बाँड्छ)

दिश - आदिशति (आदेश दिन्छ) उपदिशति (उपदेश दिन्छ) संदिशति (सन्देश दिन्छ) निर्दिशति (देखाउँछ)

दा - आदत्ते (लिन्छ) व्याददाति (ढाक्छ)

धा - अभिदधाति (भन्छ) संदधाति (सन्धि गर्छ) विदधाति (गर्छ) परिदधाति (लगाउँछ) निदधाति (धरौटी राख्छ)

नी - अनुनयति (अनुनय गर्छ) अभिनयति (अभिनय गर्छ) आनयति (ल्याउँछ) उपनयति (ल्याउँछ) उपनयते (ब्रतबन्ध गर्छ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिणयति (विवाह गर्छ) प्रणयति (रचना गर्छ) अपनयति (हटाउँछ) निर्णयति (निर्णय् गर्छ)

पत - आपतति (आइपर्छ) उत्पतति (उड्छ) निपतति (खस्छ)

पद - उत्पद्यते (उत्पन्न हुन्छ) विपद्यते (विपत्तिमा पर्छ)

भू - अनुभवति (अनुभव गर्छ) अभिभवति (तिरस्कार गर्छ) पराभवति (हार्छ) प्रभवति (समर्थ हुन्छ)

रम - विरमति (रोकिन्छ) उपरमति (मर्छ) आरमति (आराम गर्छ)

रुध् - अनुरुणद्धि (अनुरोधगर्छ) विरुणद्धि (विरोध गर्छ)

लप - आलपति (कुराकानी गर्छ) विलपति (विलाप गर्छ) प्रलपति (प्रलाप गर्छ) संलपति (कुराकानी गर्छ)

वद - विवदते (झगडा गर्छ) अनुवदति (नक्कल गर्छ) प्रतिवदति (उत्तरदिन्छ)

वस - अधिवसति (बस्छ) उपवसति (नजिकै बस्छ) प्रवसति (परदेशमा बस्छ)

वह - उद्वहति (बिहे गर्छ) अतिवहति (बिताउँछ) प्रवहति (बग्छ)

विश् - उपविशति (बस्छ) प्रविशति (पस्छ)

वृत - अनुवर्तते (पछि लाग्छ) आवर्तते (फर्कन्छ) निवर्तते (फर्कन्छ) प्रवर्तते (शुरु हुन्छ)

सद - अवसीदति (दुःख पाउँछ) उत्सीदति (नष्ट हुन्छ) आसीदति (पुग्छ) प्रसीदति (खुशी हुन्छ) विषीदति। (दुःखितहुन्छ) निषीदति: (बस्छ)

सृ - अपसरति (हट्छ) निस्सरति (निक्लिन्छ) प्रसरति (फैलन्छ)

स्था - उत्तिष्ठति (उठ्छ) उपतिष्ठते (पुग्छ)

हृ - अपहरति (चोर्छ) आहरति (लैजान्छ) उद्धरति (उद्धारगर्छ) अभ्यवहरति (खान्छ) प्रहरति (हिर्काउँछ) विहरति (खेल्छ)

ह्वे - आह्वयते (बोलाउँछ ।

समाप्तोऽयं ग्रन्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

22808 / Acc. 22404

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu